
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

भा॰ द्वा॰
१

॥श्रीगणेशायनमः॥ ॥जयंति श्रीपरमानंदकृपापांगलसद्दृशः॥ याः नित्यमनुवर्त्तंते संपदो विनिरूप गताद्दशः
मोः॥१॥ ॥उक्तं त्रयोदशाध्यायैर्द्वादशे त्वाश्रयः सतः॥ अधिष्ठानावधित्वाभ्यामाश्रयेश्वरः सतः॥२॥
उक्तोलयावधित्वेन प्राकृतात्यंतिके लये॥ अधिष्ठानतया चोक्तो महापुरुषवर्णने॥३॥ तत्रादौ षड्भिरध्या
यैः शुकः प्राह परीक्षिते॥ शेषैस्तत्र खिलान्याह सूतः पृष्टोथ सत्रिभिः॥४॥ स्वाश्रयश्रवणोत्कायैनविलंबो म
नीषिणा॥ इत्येष्यत्कालवैषम्यं चतुर्भिः स्तावदुच्यते॥५॥ तत्र तु प्रथमे भाविमागधान्वयभूमिपान्॥ कलिः
प्रभावतः प्राह संकरादिमलीमसान्॥६॥ एवंभूते सोमवंशे मुकुंदस्यैव क्रीडा वर्णिता व्यासएव॥ वंशोभावी पुत्रैः
वर्ण्यते ह्यहो भक्तिं मुक्त्वा मुक्त्येव वर्त्म नास्तीति वक्तुं॥७॥ तदेवं वैवस्वतमनुवंशे मवंशप्रस्तावेन श्रीकृ सो
ष्णावतारचरितानि सप्रपंचमनुवर्णितानि॥ अथेदानीं भाविसोमवंशे कलौ विजातीयसंकरादिमलीमसो
वैराग्यद्वारा श्रीकृष्णभक्तिनिगमनायानुवर्ण्यते॥ तत्र तु सोमवंशशाखासु चिरकालानुवर्तितया मागधवं १
मानुगतेति शोनुक्रम्यते॥ तत्र पुरोर्वंशे उपरिचरो वसुस्तस्य बृहद्रथः॥ तस्य जरासंधः तस्य सहदेवः पुत्रो भूदित्यनेन
नवमस्कंधे तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवाः॥ इत्यादयो रिपुंजयांता विंशतिर्विनोराजानो निरूपिताः॥१॥

तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति ॥ यो ऽन्त्य इति रिपुंजय एव पुरंजयः ॥ स्वामिनं पुरंजयं हत्वा स्वपु
त्रं प्रद्योतं राजानं करिष्यति यस्य पालको नाम सुतो भविष्यति ॥२॥३॥ प्रद्योतनाः प्रद्योतनाः प्रद्योतसंज्ञाः ८
॥४॥५॥६॥७॥८॥ नंदो नाम कश्चित् महापद्मसंख्यायाः सेनायाः धनस्य वा पतिर्भविष्यति अत एव महापद्म इ

न

॥ परीक्षिदुवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत् पृथ्व्यामेतदाचक्ष्व मे
॥ मुने ॥१॥ ॥ शुक उवाच ॥ ॥ यो ऽन्त्यः पुरंजयो नाम भविष्यो बारहद्रथः ॥ तस्यामात्यस्तु शुनको हत्वा
॥ स्वामिनमात्मजं ॥२॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥ विशाखयूपस्तत्पुत्रो भविता राजके
॥ स्ततः ॥३॥ नंदिवर्द्धनस्तत्पुत्रः पंच प्रद्योतना इमे ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः ॥४॥
॥ ~~बिंबिसारः सुतस्तस्माऽजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी~~ शिशुनागस्ततो भाव्यः काकवर्णस्तु
॥ तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥५॥ विधिसारः सुतस्तस्याऽजातशत्रुर्भविष्यति ॥
॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥६॥ नंदिवर्द्धन आजेयो महानंदिः सुतस्ततः ॥ शिशुनागा
॥ दशैवैते षष्ट्युत्तरशतत्रयं ॥७॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानंदिसुतो राजन् शूद्री
॥ गर्भोद्भवो बली ॥८॥ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ॥ ततो नृपा भविष्यंति शूद्रप्रायास्त्व
॥ धार्मिकाः ॥९॥ स एकच्छत्रां पृथिवीं अनुल्लंघितशासनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥१०॥

स्या

स्य पितस्य नाम ॥९॥ एकमेवच्छत्रं यस्यां पृथिवीं शासिष्यति पालयिष्यति ॥ क्षत्रौघदने दृष्टांत भार्गवः परशुराम इव ॥१०॥

तां

स्त

भा॰ द्वा॰
२

समाः संवत्सरान् ॥११॥ नवनंदान् नदं च तत्पुत्रांश्चैवेवं नव ॥ प्रपन्नान् विश्वस्तान् । विख्यातान् वा । द्विजं कौटिल्य
वात्स्यायनादिपर्या० यश्चाणाक्य उद्धरिष्यति उन्मूलयिष्यति ॥ मौर्याः मौर्यसंज्ञाः १२ । कथं नो क्ष्यंति नंदाद् ॥ स एवे

तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः । य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः ॥११॥ नव नंदान् द्विजः क
श्चित् प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ॥१२॥ स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्य
ति ॥ तत्सुतो वारिसारस्ततश्चाशोकवर्द्धनः ॥१३॥ सुयशा भविता तस्य संगतः सुयशः सुतः ॥ शालिशूकस्त
तस्तस्य सोमशर्मा भविष्यति ॥१४॥ शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतो
त्तरं ॥ समा भोक्ष्यंति पृथिवीं ~~कलौ~~ कुरुकुलोद्वह ॥१५॥ अग्निमित्रस्ततस्तस्मात् सुज्येष्ठो भविष्यति ॥ वसु
मित्रो भद्रकश्च पुलिंदो भविता सुतः ॥१६॥ ततो घोषः सुतस्तस्मात् ~~सुज्येष्ठो भविष्यति~~ वज्रमित्रो भविष्य
ति ॥ ततो भागवतस्तस्मात् देवभूतिरिति श्रुतः ॥१७॥ शुंगा दशैते भोक्ष्यंति दश वर्षशताधिकं ॥ ततः कण्वानि
यं भूमिर्यास्यत्यल्पगुणान्नृप ॥१८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ति ॥ चंद्रगुप्तं मौर्यं प्रथमं ॥१३॥१४॥ तेषां प्रथमो दशरथः पराशरादिभिरुक्तो ऽत्राप्यनुसंधेयस्तेन सह मौर्या दश सप्त
त्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः ॥१५॥ ॥ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति
स च शुंगानां प्रथमः ततोऽग्निमित्रादयो नवैवेवं शुंगाः दशवर्षाशताधिकं द्वादशाधिकं वर्षशतं ॥१८॥ ॥

२

B

कथं कण्वान्यास्यति तदाह शुंगमिति ॥ परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं करिष्यति ॥१९॥ कण्वानां चतुर्थः सुशर्मा इमे वसुदेवादयः कण्वायनाः वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यंति ॥२०॥ कण्वानामंतिमं सुशर्माणं हत्वा बलिह्निक नामा तद्भृत्यो गां भोक्ष्यति ॥२१॥१४॥

शुंगं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनं ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥१९॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ कण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे ॥२०॥ हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः ॥२१॥ कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥२२॥ लंबोदरस्तु तत्सुत्रः तस्माच्चिबिलको नृपः ॥ मेघस्वातिश्चिबिलकादटमानस्तु तस्य च ॥२३॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः ॥२४॥ चकोरो बहवो यत्र शिवस्वातिररिंदम ॥ तस्यापि गोमती पुत्रः पुरीमान् भविता ततः ॥२५॥ मेदशिराः शिवस्कंदो यज्ञश्री तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यः चंद्रविज्ञः सुलोमधिः ॥२६॥ एते त्रिंशन्नृपतयः चत्वार्यब्दशतानि च ॥ षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन ॥२७॥७॥७॥७॥

यत्र येषु बहुसंज्ञेषु [illegible] अष्टसु नवमः शिवस्वातिनामा भविता ॥२५॥२६॥२७॥७॥७॥७॥

च

स्य

भा॰ द्वा॰
२ थां

आवभृत्याः अवन्तिर्नगरी तद्राजानः ॥२९॥ एते आभीरादयो मौनक्षितिरक्षकाः। पंचषष्टिर्नृपा एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति ॥ ततः पूर्वोक्ता एकादशमौनाः त्रीण्यब्दशतानि क्षितिं भोक्ष्यंति तैः संस्थिते तेषु मौनेषु मधुकिलिकिलायां नृपतयो भविष्यंती सन्तेरणान्वयः ॥३०॥ अधिकानि च षड्वर्षाणि ॥३१॥ तेषां भूतनंदादी

सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भविष्यंति चलोलुपाः ॥२८॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश चतुष्ककाः ॥ भूयो दश गुरुंडाश्च मौना एकादशैव तु ॥२९॥ एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिं ॥ भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ॥३०॥ किलिकिलायां नृपतयो भूतनंदोऽथ वंगिरिः ॥ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ॥३१॥ तेषां त्रयोदश सुता भवितारश्च बाल्हिकाः ॥ पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥३२॥ एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः ॥ वेदूरपतयो भाव्या नेषधास्तत एव हि ॥३३॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

रम

भोयथायथं बाल्हिकोनामानस्त्रयोदश सुताः भविष्यंति ॥ पुष्पमित्रोनामान्योराजन्यः अस्य च दुर्मित्रोनामपुत्रः ॥३२॥ तथा आंध्राः कौशलाः वेदुरपतयः निषधाश्च ॥ ॥ एते च तत्तद्देशनामभिः प्रख्याता स्तुल्यकालाः ॥ खंडमंडलेषु भूपाः ॥ तत एतेभ्यो बाल्हिकेभ्य एव भाव्या भविष्यंति ॥३३॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

३२॥
२

ततश्च मागधानां तु राजा विस्फूर्जिर्नाम भविता ॥ सच पूर्वोक्तात्पुरंजयात्परः पुरंजयादिति प्रसिद्धः ॥ स च वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति ॥ अपरानिति पाठे अन्यान् पुलिंदादिसंज्ञान् वर्णान् करिष्यतीत्यर्थः ॥ ३४ ॥ स च एवं कृत्वा अब्रह्मभूयिष्ठाः अत एव एयं प्रचुराः सतीः प्रजाः स्थापयिष्यति ॥ पालयिष्यति स च पद्मवत्यां पुरि । अनुगंगां गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३५ ॥ ॐ

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यति परो वर्णान् पुलिंदयदुमद्रकान् ॥ ३४ ॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगंगामाप्रयागं गुप्तां भोक्ष्यति मेदिनीं ॥ ३५ ॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः ॥ ३६ ॥ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं ॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ ३७ ॥ तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एते ऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३८ ॥ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ॥ ३९ ॥ असंस्कृताः क्रियाहीना रजसा तमसावृताः ॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥ ४० ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजतश्च क्षयं यास्यंति पीडिताः ॥ ४१ ॥ ॥ इति श्रीभागवते द्वादश ॥ प्रथमोध्यायः ॥ १ ॥ ७ ॥ ७ ॥ ७ ॥

तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्विजाः व्रात्या उपनयनरहिता भविष्यंति ॥ ३६ ॥ अब्रह्मवर्चसः वेदा

४

चारशून्याः ॥ ३७ ॥ इमे च म्लेच्छप्राया भूभृतः ॥ तुल्यकाला भविष्यंति ॥ किंच एते सर्वे धर्मानृतपराः अधर्मे
अनृते च परिनिष्ठिताः ॥ फल्गुदाः अल्पदातारः ॥ ३८ ॥ उदितास्तमितप्रायाः हर्षशोकादिबहुलाः ॥ ३९ ॥
असंस्कृता गर्भाधानादिसंस्काररहिताः ॥ प्रजाः भक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ॥ ४० ॥
किंच तन्नाथाः ते नाथा येषां ते जनपदा देशवर्त्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामिव शीलमाचा
॥ [illegible]नाचारो वादश्च तद्वतः ॥ ४१ ॥ ॥ इति द्वादशे प्रथमः ॥ १ ॥ छ ॥

॥ श्रीशुक उवाच ॥ ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नंक्ष्यत्यायु
र्बलं स्मृतिः ॥ १ ॥ वित्तमेव कलौ नॄणां जन्माचारगुणोदयः ॥ धर्मन्याय व्यवस्थायां कारणं
बलमेव हि ॥ २ ॥ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृत्त्या न्याय दौर्बल्यं पांडित्ये
चापलं वचः ॥ ४ ॥ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ॥ ५ ॥ छ ॥

द्वितीये तु कले दोषवृद्धौ कल्क्यवतारः ततः ॥ अधर्मिष्ठे जनेन नष्टे पुनः कृतयुगागमः ॥ कलिधर्मान्प्रपंचयति ॥ त
तः श्चेत्यादिना ॥ १ ॥ धर्मन्याययोर्व्यवस्थायां बलमेव ॥ १ ॥ दांपत्ये तिं पतिभावे अभिरुचिरेव हेतुः ॥ न कुलगो
त्रादिः व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठये रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥ ३ ॥ छ ॥
दांपत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिः विप्रत्वे सूत्रमेव हि ॥ ३ ॥ ५

दे ४

आश्रमाणां ख्यातो ज्ञाने लिंगमेव दंड जिनादिकं हेतुर्न त्वाचार विशेषः ॥ अन्योन्यापत्तिकारणं च । आश्रमादाश्र
मांतरप्राप्तौ च कारणं ॥ यद्वा बहूदक हंसादीनामन्योन्यापत्तौ नमस्कारादि व्यवहारे कारणं ॥ अवृत्त्या मुद्रार्प
णादि   दानासामर्थ्येन न्यायदौर्बल्यं पराजयः ॥ चापलं वचः । बहुभाषणं ॥ ४ ॥ ७ ॥ ७ ॥ ७ ॥

दूरे वार्ययनं तीर्थं लावण्ये केशधारणं ॥ उदरं भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥ ६ ॥ दाक्ष्यं कुटुंब
भरणं यशोर्थे धर्म सेवनं ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥ ७ ॥ ब्रह्मविट्क्षत्रशूद्राणां
यो बली भविता नृपः ॥ प्रजा हि लुब्धै राजन्यै निर्घृणैर्दस्युधर्मभिः ॥ ८ ॥ आछिन्नदारविद्रोणाः
यास्यंति गिरिकाननं ॥ शाकमूलामिषक्षौद्र फल पुष्पाष्टि भोजनाः ॥ ९ ॥ ७ ॥ ७ ॥

असाधुत्वे चौर्यधिभिर्योगे प्रसाधनं अलंकारः ॥ ५ ॥ दूरे वर्तमानं वार्ययनं जलाशयस्तीर्थं न तु गुर्वादिः ॥
स्वार्थः पुरुषार्थः ॥ ६ ॥ ७ ॥ ८ ॥ आछिन्ना अपहृता दाराः द्रविणानि च यासां ताः अष्टिबीजं ॥ ९ ॥ ७ ॥ ७ ॥

१०॥क्षीयमाणेष्विसादीनां इथं कलौगतप्राय इति पंचमेनान्वयः॥क्षीयमाणेषु अल्पप्रायेषु॥१२॥दस्युप्रायेषु चौर तुल्येषु चौर्यानृतवृथाहिंसा घानानावृत्तयोयेषांतेषु॥१३॥छागप्रायासुप्रमाणतः क्षीरतश्च अजातुल्यासु॥१४॥ स्थास्नुषु वृक्षेषु विद्युत्प्रायेषु तडिद्वत्कुलेषु॥शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु॥१५॥जनेषु खरस्थ

५

अनावृष्ट्यावनंक्ष्यंति दुर्भिक्षकरपीडिताः॥शीतवातातपप्रावृड्हिमैरन्योन्यतःप्रजाः॥१०॥
क्षुत्तृड्भ्यां व्याधिभिश्चैव संतापेन च चिंतया॥त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणां॥११॥क्षीय
माणेषु देहेषु देहिनां कलिदोषतः॥वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां॥१२॥पाखंडप्रचुरे धर्मे द
स्युप्रायेषु राजसु॥चौर्यानृतवृथाहिंसा नानावृत्तिषु वै नृषु॥१३॥शूद्रप्रायेषु वर्णेषु छागप्रायासु धे
नुषु॥गृहप्रायेष्वाश्रमेषु योनप्रायेषु बंधुषु॥१४॥अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु॥
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु॥१५॥इथं कलौ गतप्राये जनेषु खरधर्मिणि॥धर्मत्राणाय
सत्वेन भगवानवतरिष्यति॥१६॥ ॥७॥ ७॥ ॥७॥७॥श्री॥राम॥ ॥

र्मिणि दुःसहत्वे स्थिते कलौ गतप्राये समाप्ते ये॥१६॥ ॥७॥७॥७॥७॥

मा

५

ना०   द्वा०

एतत्प्रपंचयति चतुर्भिः चराचरगुरोः ईश्वरस्येव ॥ धर्मत्राणे हेतुः गुरुत्वे ऐश्वर्ये च योरुपपादनं ॥ अखिलस्य विश्वस्यात्मनः कारणस्येति ॥ एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय धर्मत्राणप्रयोजनमाह ॥ कर्मानुन्नतये मोक्षाय ॥१७॥ शंभलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्या भवने गृहे ॥१८॥ धर्मत्राणप्रकारमाह अश्वमिति ॥ असाधु

स्य

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये ॥१७॥ शंभलग्रामुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥१८॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनासाधुदमनमष्टैश्वर्यगुणान्वितः ॥१९॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति ॥२०॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

वो दम्यं तेये न तमश्वमारुह्यासिना दस्यून्कोटिशो निहनिष्यतीत्यन्तरेणान्वयः ॥ असाधुदमन इतिपाठे कल्किविशेषणं ॥१९॥ तत्प्रपंचः आशुना शीघ्रगामिना तेन हयेन क्षोण्यां विचरन् ॥ अणिमाद्यैरष्टैश्वर्याणि गुणाश्च सत्यसंकल्पादयः तैरन्वितः नृपलिंगच्छदः राजवेषछन्नान् ॥२०॥ ॥७॥७॥७॥७॥७॥७॥

६

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह ॥ अथेति सार्धैस्त्रिभिः। तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति तत्र हेतुः ॥ वासुदेवस्यांगरागेण चंदनादिना ऽतिपुण्यगंधो ऽनिलस्तं स्पृशंतीति तथा तेषां ॥२१॥ स्थविष्ठः स्थूलः ॥२२॥ कृतयुगप्रवृत्तिमाह यदावतीर्ण इति प्रजानां सूतिः ॥२३॥ तदवतारकालोपलक्षणमाह यदा चंद्रश्चेति ॥ तिष्यः पुष्यः अयमर्थः ॥ चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः ॥ तदा तत् कृतयुगं भविष्यतीति ॥ यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ व

अथ तेषां भविष्यंति मनांसि विशदानि वै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशां ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥२१॥ तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्वमूर्तौ हृदि स्थिते ॥२२॥ यदावतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी ॥२३॥ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यंति तदा भवति तत्कृतं ॥२४॥ ये तीता वर्त्तमाना ये भविष्यंति च पार्थिवाः ॥ ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥२५॥ ॥ ॥ ॥ ॥ ॥ ॥

र्त्तमाने द्विर्त्रास्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति तथाऽपि तेषां महाप्रवेशोऽत्र विवक्षितः ॥ समेष्यंतीति वचनात् अतो नातिप्रसंगः ॥२४॥ एवं नवमस्कंधे मारभ्यानुक्रांतं वैवस्वतमनोर्वंशद्वयं निगमयति ॥ ये ऽतीता इति ॥ उद्देशतः संक्षेपतः ॥२५॥ ॥ ॥ ॥

६

(15)

भा० द्वा०

वां

कलियुगांतरविशेषं वक्तुमाह आरभ्येत्यादिना। वर्षसहस्रं पंचदशोत्तरं ॥ शतं चेति कयाऽपि विवक्षयाऽवांतरसंख्येयं ॥ वस्तु-
तः परीक्षिन्नंदयोरंतरं द्वाभ्यां न्यूनं वर्षाणां सार्द्धसाहस्रं भवति यतः परीक्षित्समकाले मागधे मार्जारिमारभ्य रिपुंजयांता
विंशतिराजानः सहस्रसंवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे ॥ ये बार्हद्रथभूपाला भाव्याः सहस्रसंवत्सरमिति ॥ ततः प

आरभ्य भवतो जन्म यावन्नंदाभिषेचनं ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं ॥२६॥ सप्तर्षीणां तु यौ पूर्वौ
दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥२७॥ तेनैव ऋषयो युक्तास्तिष्ठंत्यब्दशतं
नृणां ॥ ते त्वदीये द्विजाः काल अधुनाचाश्रिता मघाः ॥२८॥ ॥छ॥छ॥छ॥छ॥छ॥

रं च प्रद्योतना अष्टत्रिंशदुत्तं ॥ शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यंति पृथिवीमित्यत्रैवोक्तत्वात् ॥२६॥ कलेः
प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह ॥ सप्तर्षीणां त्विति ॥ अयमर्थः प्रागग्रशकटाकारं तारासप्तकं सप्तर्षि
मंडलं ॥ तत्र किंचिदुन्नतं तेषामग्रस्थानीयो मरीचिः ततः पश्चादनंतं युगकं धराकारो वशिष्ठः सभार्यः ॥ ततः पश्चादिष
दुन्नतेषां मूलस्थानीयो गिरा ततः पश्चा चतुरस्रतारा चतुष्के ईशान्येऽत्रिः दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः
पुलहस्ततउत्तरतः ऋतुः ॥ एवं स्थितेषु तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ पुलहऋतुसंज्ञौ तयोस्तु मध्ये तयो स्तु प्र

र २
ल
ये १
नृ २
म ३

चरम ७

र्वेयो मध्येयत्समंदक्षिणतः समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्येते ॥२७॥ तेन नतथे वयुक्तान्नृणामब्दशतं तिष्ठंतिते च वृद्धि जास्स्वकीये काले धुना मघा आश्रिता वर्त्तंते ॥२८॥ यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्वात्मको देहः दिवं वैकुंठं गतः ॥ तदा कलियुगमविशान् यत्‌ यस्मिन्‌ युगे जनः पापे रमत इति कलियुगस्य लक्षणं ॥ २९ ॥ ननु श्रीकृष्णे पृथिव्यां वर्त्तमाने पि संध्यारूपेण कलिः प्रविष्ट एवासीत्स संतथापि तावत्तस्य पराक्रमो नाभवदित्याह ॥ याव

आरभ्य भवतो जन्म यावन्नंदाभिषेचनं ॥ एतद्वर्षसहस्रं तु शतं पंच

विष्णोर्भगवतो भानुः कृष्णाख्यो ऽसौ दिवं गतः ॥ तदा विशत्कलिर्लोकं पापे यद्रमते जनः ॥२९॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ॥ ३०॥ यदा देवर्षयः सप्त मघासु विचरंति हि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१॥ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३२ ॥ ॥ ॥ श्रीराम ॥ जयराम ॥ जय ॥ जय ॥ राम ॥ ७ ॥

दिति पराक्रांतुं अभिभवितुं ॥ ३० ॥ अतो यथोक्त एव कलिप्रवेशकाल इत्याह ॥ यदा देवर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यांशाभ्यां सहितयो द्वादशाब्दशतात्मकः स कलिः तदा संध्यामतिक्रम्य प्रविष्टः इत्यर्थः ॥ ३१ ॥ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदेति । तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नंदात्प्रभृत्यतिवृद्धिं गमिष्यती

७

त्यर्थः ॥ ३२ ॥ ननु यदा कलेर्लिंगमुपलब्ध्यं तदैव प्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशः ॥ ततः परं वृद्धिरित्य त्र किं प्रमाणं
तत्राह ॥ यस्मिन्निति प्रतिपन्नं प्रविष्टमिति ज्ञातं ॥ पुराविदः पूर्वज्ञातारः ॥ ३३ ॥ कले रनंतरं कृतयुगप्रवेशमाह ॥ दि
व्या नामिति ॥ च तुर्थे कलौ प्रवेशनाब्दपरिमितेनांशेनापि सहातीते सती त्यर्थः ॥ कृतयुगप्रवेशचिन्हमाह यदा नृ

यस्मिन् कृष्णो दिवं यातः तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥ ३३ ॥ दिव्या
दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः कृतं ॥ भविष्यंति यदा नृणां मन आत्मप्रकाशकं ॥ ३४ ॥ इत्येष मा
नवो वंशो यथा संख्यायते भुवि ॥ तथा विट् शूद्र विप्राणां तास्ता ज्ञेया युगे युगे ॥ ३५ ॥ एतेषां नाम लिं
गानां पुरुषाणां महात्मनां ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३६ ॥ ॥ छ ॥ छ ॥

मनः आत्मप्रकाशकं भविष्यति ॥ ३४ ॥ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यतिदिशति ॥ इत्येष इति ॥ यथा
याभिरुच्चनीचावस्थाभिः ॥ तास्ता अवस्थाः वंशा इति च पाठः एतत्कीर्तनस्य वैराग्योपयोगितामाह ॥ एतेषामिति ना
मैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यपुत्रादयो वा ॥ ३६ ॥ छ ॥

कलावुत्सन्नानां राजवंशादीनां पुनःप्रवृत्तिप्रकारमाह॥ देवापिः सोमवंशराजः॥ मरुः सूर्यवंशराजः॥ कलापग्रामो नाम योगिनामावासः प्रसिद्धः॥३७॥३८॥ इममेव प्रकारं प्रतिचतुर्युगं दर्शयति॥ कृतमिति॥३९॥ तेषां नामलिंगानामित्यादि यदुक्तं तत्प्रपंचयति राजन्नितिपंचभिः॥४०॥ ममत्वं कलेवरे सनेन शश्चितां भूतद्रोहप्रवृत्तिं निंदति क्रिमीति॥ राजन्नोम्नः ति राजेतिनामयस्य तस्यापि देहस्यांते क्रिमयो विष्ठा भस्मेति वा संज्ञा भविष्यति॥ तत्कृते तदर्थं यो भूतधकृ भ्रतेभ्यो द्रुह्य

देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः॥ कलापग्राम आसाते महायोगबलान्वितौ॥ ताविहेत्य कलेरंते वासुदेवानुशिक्षितौ॥ वर्णाश्रमयुतं सर्वं पूर्ववत्स्थापयिष्यतः॥३८॥ कृतं त्रेता द्वापरं कलिश्चेति चतुर्युगं॥ अनेन क्रमयोगेन भुविप्राणिषु वर्त्तते॥३९॥ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे॥ भूमौ ममत्वं कृत्वा ते हित्वेमां निधनं गताः॥४०॥ क्रिमिविड्भस्मसंज्ञांते राजनाम्नो पियस्य च॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥४१॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्ववंशजस्य वा॥४२॥ तेजोवन्नमयं कायं गृहीत्वात्मतयाबुधः॥ मत्तोममत्तया चोभौ हित्वांते दर्शनं गताः॥४३॥ ये ये भूपतयो राजन्भुंजंति भुवमोजसा॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च॥४४॥ इति०
॥ द्वा० वंशानुकीर्त्तनं द्वितीयः॥

ति स किं स्वार्थं वेद कुत इत्यपेक्षायां हे तु त्वे भूतद्रोहं विद्धि न ष्ठिय नो भूतद्रोहान्निरयो भवतीति ममत्वप्रकारं

८

तत्क्र

८

न

15

प्रपंचयति कथमिति सेयमखंडा भूः मे पूर्वजैः पुरुषैः धृता सती मत्पुत्रादेः कथं स्यादित्येवं ॥४२॥ उभे मर्त्ये प्रायं च अ
दर्शनं मत्स्येः ॥४३॥ उपसंहरति ॥ ये य इति ॥ ते सर्वे च कथासु क्रियमाणासु कथामात्राः कालेन हृताः ॥४४॥ ॥ इति द्वा
दशे द्वितीयः ॥ ॥७॥७॥ ॥ तृतीये भूमिगीतैश्च राज्यदोषादि वर्ण्यते ॥ कलौ च दोषभूयिष्ठे दोषहंत्री हरेर्नतिः ॥ देहे
हं तां भ्रमो च ममतां कुर्वंतो बुध्या इत्युक्तं तदेव भूमिगीतैः प्रपंचयति दृष्ट्वेत्यादि ॥ आत्मनि पृथ्वीं जये व्यग्रान् उद्यु

॥श्रीशुक उवाच ॥ ॥ दृष्ट्वात्मनि जये व्यग्रान् नृपान् हसति भूरियं ॥ अहो मां विजिगीषंति मृत्योः क्रीडनका
॥नृपाः ॥१॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिंडे येऽतिविश्रंभिता नृपाः ॥२॥ पूर्वं नि
॥र्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ॥ ततः सचिवपौराप्तकरींद्रानस्य कंटकान् ॥३॥ एवं क्रमेण जेष्यामः पृ
॥थ्वीं सागरमेखलां ॥ इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं ॥४॥ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा ॥
॥कियदात्मजयस्यैतन्मुक्तिरात्मजये फलं ॥५॥ ॥७॥७॥७॥ श्रीराम ॥ जय ॥ राम ॥

ह्मानू हासप्रकारमेवाह अहो इति ॥१॥ येन कामेन फेनोपमे पिंडे देहे विश्रंभिता विश्वासं नीता ये तेषां नरेंद्राणां स एव का
मो मोघ एव स्यात् ॥२॥ काममेव दर्शयति द्वाभ्यां ॥ पूर्वमिति इंद्रियार्थलंपटस्य न राज्यप्राप्तिः स्यादिति प्रथममिंद्रियषड्वर्गं नि
र्जित्य राजमंत्रिणो जेष्यामः ॥ वशीकरिष्यामः ॥ सचिवा अमात्याः करींद्रा हस्तिपाः ॥ तांश्च जेष्यामः ॥ कंटकान् प्रतिप
क्षान् अस्य अपास्य ॥ अथ कंटकानिति वा पाठः ॥३॥ इति एवं केचिदाशाबद्धहृदयाः ॥४॥ एवं केचित्पुनर्मां जित्वा

९

प्यतित्वन्कृत्या अच्छिं विशंति । तदेव मिंद्रियजयेनयेराज्यं साधयितु मिछंतितेऽतिमंदाइत्याह कियदितिअतः अंतकं न पश्यंतीत्यर्थः तदेवाहयामिति ॥ कुरूद्वहेति भूमि गीतं कथयन् रुरुकं संबोधयति ॥ कुलोद्वह इतितुपाठः सुगमः ॥ ६ ॥ अबुद्धयः इत्यर्थः तत्प्रपंचयति । मत्कृतइति ॥ ७ ॥ ८ ॥ रामोनामकश्चिद्राजायद्वालोकदृष्ट्यादाशरथिरेव निर्दिष्टः ॥ ९ ॥ १० ॥
॥ लोकंरावयति रोदयतीति लोकरावणः ॥ ११ ॥ १२ ॥ ० ॥ ० ॥ ० ॥

॥ यां विसृज्यैवमनवः स्तत्सुताश्च कुरूद्वह ॥ गतायथागतं युद्धे तांमांजेष्यंत्यबुद्धयः ॥ ६ ॥ मत्कृतेपितृपुत्राणां ॥ भ्रातृणांचापिविग्रहः ॥ जायतेह्यसतांराज्येममताबद्धचेतसां ॥ ७ ॥ ममैवेयंमहीकृत्स्नानतेमूढेतिवादिनः ॥ ॥ स्पर्द्धमानामिथोघ्नंतिम्रियंतेमत्कृतेनृपाः ॥ ८ ॥ पृथुः पुरूरवागाधिर्नहुषोभरतोर्जुनः ॥ मांधातासगरोरामः खट्वांगोधुंधुहारघुः ॥ ९ ॥ तृणबिंदुर्ययातिश्च शर्यातिः शंतनुर्गयः ॥ भगीरथः कुवलयाश्वः ककुत्स्थोनैषधोनगः ॥ १० ॥ ॥ हिरण्यकशिपुर्वृत्रोरावणोलोकरावणः ॥ नमुचिः शंबरोभौमोहिरण्याक्षोऽथतारकः ॥ ११ ॥ अन्येच ॥ बहवोदैत्याराजानोयेमहेश्वराः ॥ सर्वेसर्वविदः शूराः सर्वेसर्वजितोजिताः ॥ १२ ॥ ममतांमय्यवर्त्ततकृत्वोच्चैर्मर्त्य ॥ धर्मिणः ॥ कथावशेषाः कालेनह्यकृतार्थाः कृताविभो ॥ १३ ॥ ० ॥ ० ॥ ० ॥

मयिउच्चैर्ममतांकृत्वायेअवर्त्तंतते कालेन कथावशेषाः कृताः विभो इति संबोधनं कुरूद्वहेति वा ॥ १३ ॥ ॥ ० ॥ ० ॥

९

नु कथनस्य तात्पर्यमाह १

राजवंशौ कथा इमा इति विज्ञानं विषयासारता ज्ञानं। ततो वैराग्यं तयोर्विवक्षया। परेयुषां मृतानां॥ वचो विभूतीः वाग्विलासमात्ररूपाः परमार्थ्यं परमार्थयुक्तं कथनं न भवतीत्यर्थः॥१४॥ कस्तर्हि पुरुषाणामुपादेयः परमार्थः तमाह यस्त्विति॥ नित्यं प्रत्यहं तत्रापि अभीक्ष्णं॥१५॥ कलिदोषोपचये सति मोक्षसंभवं मन्यमानः पृच्छति। केनोपायेनेति विधमिष्यंति नाशयिष्यंति यथा यथावत् १६ कलियुगे कः परमो धर्म इति बुभुत्सया पृच्छति॥ युगानीति ब्रूहीत्यनुषंगः॥ आ

श्रीः

कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषां॥ विज्ञानवैराग्यविवक्षया विभो वचो विभूतीर्न तु पारमार्थ्यं॥१४॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः॥१५॥ ॥श्रीराजोवाच॥ केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः॥ विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने॥१६॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः॥१७॥ ॥श्रीशुक उवाच॥ ॥कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः॥ सत्यं दया तपो दानमिति पादा विभोर्नृप॥१८॥ ॥७॥७॥७॥७॥७॥७॥७॥७॥

ष्यंतिक जिज्ञासया पुनः पृच्छति। प्रलयकल्पयोः संहारस्थितिकालयोः न चायं बहिर्मुखः प्रश्नः इत्याह कालस्येति॥१७॥ तत्र युगधर्मांस्तावदाह। कृत इति॥ तज्जनैस्तत्कालीनैर्जनैः॥ दानं अरागद्वेषतया अभयदानं॥ तदेव प्रथमस्कं

घेशौचश्चाब्देनोक्तं विभोः संपूर्णस्य धर्मस्य ॥१८॥ तदानींतनजनाँ ह्ल संतुष्टा इति ॥ मैत्राः स्नतेमैत्रीयुक्ताः श्रे णा आत्मा न्यासवंतः ॥१९॥२०॥ ब्रह्मोत्तराः ब्राह्मणाधिकाः ॥२१॥ अनृतेन सत्यं ॥ हिंसया दया असंतोषेण तपः विग्रहेण दानमिति

१०

संतुष्टाः करुणा मैत्राः शांता दांता स्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः ॥१९॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः ॥२०॥ तदा क्रियातपोनिष्ठा नाति हिंस्रा न लंपटाः ॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ॥२१॥ तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे ॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याऽधर्मलक्षणैः ॥२२॥ यशस्विनो महाशालाः स्वाध्यायाध्ययने रताः ॥ आढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः ॥२३॥ कलौ तु धर्मं हेतूनां तुर्यांशोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यंते सोऽपि विनंक्ष्यति ॥२४॥ ॥छ॥छ॥छ॥छ॥

यथासंख्यं योज्यं ॥ हिंसातुष्ट्यनृतद्वेषैरित्ययं क्रमो ... न विवक्षितः ॥ धर्मस्यार्द्धं ह्रसति क्षीयेत अधर्मस्य लक्षणैः चिन्हैः पादैरित्यर्थः ॥२२॥ यशस्विनः कीर्त्तिप्रियाः क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः ॥२३॥ कलौ धर्मपादानां तुर्यांशः चतुर्थांशोऽवशिष्यते ॥२४॥ ॥छ॥छ॥छ॥छ॥

१०

(१७)

शूद्रदासोत्तराः शूद्रैकवर्त्तादिप्रधानाः ॥२५॥ युगानामेवं भूतवैषम्ये कारणमाह ॥ सत्वमिति पंचभिः ॥२६॥ मनश्च बुद्धिश्चेंद्रियाणि च सत्वे यदा प्रभवंति अतिशयेन वर्त्तंते ॥ यदा कर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं द्वापरं जानीहि ॥ त्रेतायुगमिति जानीहि ॥२८॥ काम्यानां कर्मणां विषये यदा प्रीतिः तत्तदा रजस्तमः प्रधानं द्वापरं जानीहि ॥२९॥

॥ विषादनं दुःखं ॥३०॥ ॥७॥ ७४

तस्मिन् लुब्धा दुराचाराः निर्दयाः शुष्कवैरिणः ॥ दुर्भगाभूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥२५॥ सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः ॥ कालसंचोदितास्ते वै परिवर्त्तंत आत्मनि ॥२६॥ प्रभवंति यदा सत्वे मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विंद्यात् ज्ञाने तपसि यद्रुचिः ॥२७॥ यदा कर्मसु काम्येषु भक्तिर्भवति देहिनां ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥२८॥ यदा माया नृतं तंद्रा निद्रा हिंसा विषादनं ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥३०॥ यदा लोभस्त्वसंतोषो मानो दंभोथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥२९॥

त्रिंशत्

११

कलिदोषान्प्रपंचयति यस्मादित्यादिना ॥ यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभाग्याः अल्पभाग्याः महाशनाबह्वाहाराः वित्तहीनाः ॥ ३२ ॥ कामिनः स्वैरिण्यः पुंश्चल्यः असती असत्यः ॥ ३१ ॥ दस्यवः उत्कृष्टाः प्रचुरा येषु ते ॥ ३३ ॥ अव्रता विहिताचारशून्याः अशौचाः शौचशून्याश्च बटवो ब्रह्मचारिणो भविष्यंति ॥ कुटुंबिनश्च

यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥
दस्यूत्कृष्टा जनपदा वेदाः पाखंडदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥ ३३ ॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुंबिनः ॥ तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥ ३४ ॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यः चौर्यमायोरुसाहसाः ॥ ५ ॥ ३५ ॥

गृहस्थाः स्वयं भिक्षाटनपरा भविष्यंति न तु भिक्षां दास्यंति तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति ॥ न्यासिनो यतयः अतिलोलुपाः भविष्यंति ॥ ३४ ॥ पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया च कपटं च उरु च साहसं यासां ताः ॥ ३५ ॥ किंच किराटाः वणिजः पणयिष्यंति क्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यंति ॥ किंच सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां वार्त्तां वृत्तिं साधु मंस्यंते ॥ ३६ ॥ ७ ॥ ७ ॥

११

नी०

सर्वेन्निमपितद्रव्यं हीनं रुस्याः स्वद्रंति। पतयश्चविपन्नं रोगादिनिर्व्यपाराक्षमं कोले कुलपरंपरायातं त्यक्ष्यंति। अपयस्वि
नीर्दुग्धदोहाः॥३७॥ सौरतं सुरतनिमित्तं सौहृदं येषां ते। अतएव ननंदारो त्रभार्यानुगिन्य श्यालाः भार्याभ्रातरः तैः सं
वादो मंत्रालोचनं येषां ते ननंदुरितिवापाठः॥३८॥३९॥ पिशाचसंदर्शाः पिशाचसदृशाः॥४१॥ ॥७॥७॥

ढी०

~~यत्समान्यविशेषाभ्यामुपलभ्येतेसक्रमः॥ अन्योन्यापाश्रयात्सर्वमायंतवद्वस्तायत॥~~

पण्यिष्यंति वेद्रशूद्राः किराटाः कूरकारिणः॥ अनापद्यपि संस्यंते गात्रं साधुजुगुप्सितं॥३६॥ पतिं त्यक्ष्यं
क्षंति द्रव्यं न्स्त्या अप्यविलोभमं॥ न्नंसे विपन्नं पतयः कोलेगाश्चापयस्विनीः॥३७॥ पितृभ्रातृसुहृत्॥ ज्ञा

नि

तीन्नहित्वा सौहृतसौहृदाः॥ ननंदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः॥३८॥ शूद्राः प्रतिगृहीष्यंति तपो वेषो
पजीविनः॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं॥३९॥ नित्यमुद्विग्नमनसो दुर्भिक्ष करकर्शिताः॥ निरन्ने
भूतले राजन्ननावृष्टिभयातुराः॥४०॥ वासोन्नपानशयनव्यवायस्नानभूषणैः॥ हीनाः पिशाचसंदर्शा भविष्यं
ति कलौ प्रजाः॥४१॥ कलौ काकिणिके प्यर्थे विगृह्य त्यक्तसौहृदाः॥ x पुत्रा न्सर्वार्थकुशलान्क्षुद्राः शिश्नो
x त्यक्ष्यंति च प्रियान्प्राणान् हनिष्यंति स्वकानपि॥४२॥ न रक्षिष्यंति मनुजाः स्थविरौ पितरौ दरंभराः॥॥४३॥७॥७॥
रावपि॥+

काकिणिके विंशतिवराटकमात्रेप्यर्थे विषयभूते विगृह्य वैरं कृत्वा॥४२॥३॥ ॥७॥७॥

मतांतमनर्थमाहद्वाभ्यांकलाविति।त्रिलोकनाथैरवनतंनमस्कृतंपादपद्मंयस्यतंनयक्ष्यंतिनयाजयिष्यं[illegible]तिपाखं
डैर्विभिन्नमन्यथाकृतंचेतोयेषांते॥४४॥विवशोगृणन् विमुक्ताःकर्मरूपाःअर्गलाःप्रतिबंधा यस्यसः॥४५॥
तदेवंकलिदोषान्प्रपंच्यप्रस्तुतं तन्निस्तारोपायमाहपुंसामितिषड्भिः॥द्रव्यदेशात्मनिःसंभवोयेषांतान्चित्त

कलौनराजन्जगतांपरंगुरुंत्रैलोक्यनाथानतपादपंकजं॥प्रायेणमर्त्याभगवंतमच्युतंयक्ष्यंतिपाखंडविभि
न्नचेतसः॥४४॥यन्नामधेयंम्रियमाणआतुरःपतन्स्खलन्वाविवशोगृणन्पुमान्॥विमुक्तकर्मार्गलउत्त
मांगतिंप्राप्नोतियक्ष्यंतिनतंकलौजनाः॥४५॥पुंसांकलिकृतान्दोषान्द्र[illegible]व्यदेशात्मसंभवान्॥सर्वान्
हरतिचित्तस्थोभगवान्पुरुषोत्तमः॥४६॥श्रुतःसंकीर्तितोध्यातःपूजितश्चादृतोपिवा॥नृणांधुनोतिभग
वान्हृत्स्थोजन्मायुताशुभं॥४७॥यथाहेम्निस्थितोवन्हिर्दुर्वर्णंहंतिधातुजं॥एवमात्मगतोविष्णुर्योगि
नामशुभाशयं॥४८॥ ॥७॥७॥७॥७॥७॥७॥

स्थःचित्तेस्फुरितः॥४६॥४७॥अयमेवोपायोनान्यइति सदृष्टांतमाहयथेतिधातुजंताम्रादिसंश्लेषजातंहेम्नो
दुर्वर्णंमालिन्यंतत्रस्थितोवन्हिरेवहरतिनतुनोयादि।एवंयोगिनामपिविष्णुरेवनतुयोगादिकमित्यर्थः॥४८॥

एतदेव विवृणोति ॥ विद्येति विद्यादेवतोपासना ॥ आत्मभावं स्वस्वरूपं ॥४९॥५१॥ इदानीं कलिं स्तौति द्वाभ्यां कले र्दोषनिधेराजन्निति तत्सर्वं हरिकीर्त्तनादेव कलौ भवति ॥५२॥३॥ द्वादशेऽत्र तृतीयः ॥३॥ ॥ ॥
चतुर्थे तु चतुर्द्धा कालप्रलयो नैमित्तिकादयः ॥ तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते ॥ कलिदोषनिवर्त्तकं हरि

विद्यातपःप्राणनिरोधमैत्री तीर्थाभिषेकव्रतदानजाप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे
भगवत्यनंते ॥४९॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं ॥ म्रियमाणो ह्यवहितस्ततो याति परां ग
तिं ॥५०॥ म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ॥ आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ॥५१॥
कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥ कीर्त्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ॥५२॥ कृते
यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ॥५३॥ ॥ इति श्रीभा० द्वा०
तृतीयोऽध्यायः ॥३॥ ॥ ॥ ॥ श्रीशुक उवाच ॥ ॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप ॥ कथितो
युगमानं च शृणु कल्पलयावपि ॥१॥ ॥ ॥ ॥

नामसंकीर्त्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयस्योत्तरमुक्तं यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति ॥
तदिदानीं तृतीयस्कंधोक्तकालानुवादपूर्वकं निरूपयति ॥ काल इति स कालः परमाणुर्वै यो भुंक्ते परमाणु
ता मित्यादिना कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि

॥ इति द्वादशस्कंधे ... ॥

१२

तत्र कल्पमानमाह ॥ । चतुर्युगेति ॥ यत्र चतुर्दश मनवः क्रमेण भवंति प्रलयस्तु चतुर्विधः ॥१॥ नैमित्तिकः प्राकृतिक आत्यंतिको नित्यश्चेति तत्र नैमित्तिकं प्रलयं मानस हितमाह ॥ तदंते इति द्वाभ्यां ॥ तावान् चतुर्युगसाहस्रप्रमाणः सैव ब्राह्मी रात्रिः ॥३॥ नैमित्तिकं त्वं दर्शयति ॥ यत्र यदा विश्वसृक् श्रीनारायणः विश्वमात्मसात्कृत्य स्वस्मिन् उपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मण एवानंतासनत्वमुक्तं । ब्रह्म

चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥२॥ तदंते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता ॥ त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि ॥३॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ॥४॥ द्विपरार्द्धे गतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै ॥५॥ एष प्राकृतिको राजन् प्रलयो यत्र लीयते ॥ आंडकोशस्तु संघातो विघात उपसादिते ॥६॥ ॥७॥७॥७॥७॥७॥७॥७॥७॥

णो निद्रां निमित्तीकृत्य प्रवर्त्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ॥४॥ प्राकृतिकं प्रलयमाह द्वाभ्यां द्विपरार्द्धे तु ब्रह्मण आयुषि सप्त प्रकृतयः महदहंकार पंचतन्मात्राणि ॥५॥ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यं ब्रह्मांडस्य च लयात् प्राकृतिक इत्यर्थः विघाते विघातकारणे उपसादिते सति ॥६॥ तदेवाह पर्जन्य इत्या

१२

२५

मा० द्वा०

दिना॥बुद्धीन्द्रियादिरूपेणोद्यतःप्राक्तनेनग्रंथेन॥७॥सामुद्रिकंसर्वरसंरविः पिबतेआकर्षति॥८॥अनिल
वेगोत्थः वायुवेगोद्भुतः अनिलवेगाबाइतिपाठे अनिलेन वेगो यस्य सः॥ वाः रविणारश्मिभिःपीतमुदकं
चदर्हेती त्यर्थः॥ अलिनिलवेगौवेइतिपाठे॥सुगमः॥भूविवरान् पातालादीन् शून्यान् रवि णा

पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति॥तदानिरन्नेह्यन्योन्यंभक्षमाणाःक्षुधार्दिताः॥क्षयंयास्यंतिशान
केःकालेनोपद्रुताःप्रजाः॥७॥सामुद्रंदैहिकंभौमंरसंसांवर्त्तकोरविः॥रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंच
ति॥८॥ततःसंवर्त्तकोवन्हिःसंकर्षणमुखोत्थितः॥दहत्यनिलवेगोत्थःशून्यान्भूविवरानथ॥९॥उपर्यधः
समंताच्चशिखाभिर्वन्हिसूर्ययोः॥दह्यमानंविभासंडंदग्धगोमयपिंडवत्॥१०॥

दैहिकरसाकर्षणात्प्राणिरहितान् ॥९॥ शिखाभिर्ज्वालाभिः॥१०॥छ॥छ॥छ॥

किंचिदधिकं वर्षाणां शतं संवर्तकः परो वायुर्वाति तदा रजसावृतं खं धूम्रं भवति ॥११॥ रजसः खे नैः तीव्रगर्जितैः ब्रह्मांडविवरांतरं मध्यगतं विश्वं एकोदकं एकार्णवोदकव्याप्तं ॥१२॥ उदप्लवे उदके नाप्लावित्ते सति ॥ प्रलयलाय अभावाय ॥१३॥४॥५॥ भूतादिस्तामसो हंका

ततः प्रचंड पवनो वर्षाणामधिकं शतं ॥ परः संवर्तको वाति धूम्रं खं रजसावृतं ॥११॥ ततो मेघकुलान्यंग चित्रवर्णान्यनेकशः ॥ शतवर्षाणि वर्षंति नदंति रभसस्वनैः ॥१२॥ तत एकोदकं विश्वं ब्रह्मांड विवरांतरं ॥१२॥ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे ॥ ग्रस्तगंधा तु पृथिवी प्रलयलाय कल्पते ॥१३॥ अपां रसमथो तेजस्ता लीयंते चनीरसाः ॥ ग्रसते तेजसो रूपं वायुस्त द्रहितं तदा ॥१४॥ लीयते चानिले तेजो वायोः खं ग्रसते गुणं ॥ सवै विशति खं राजंस्त तश्च नभसो गुणं ॥१५॥ शब्दं ग्रसति भूतादिर्नभस्त मनुलीयते ॥ तेजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः ॥१६॥ महान्ग्रसत्यहंकारं गुणाः सत्वादयश्च तं ॥ ग्रसतेव्याकृतं राजन् गुणान्कालेन चोदितं ॥१७॥७॥७॥७॥७॥ ❀

रः गुणै वृत्तिभिः सह ॥१८॥ अव्याकृतं प्रधानं ॥१७॥७॥७॥७॥ ❀ श्रीराम ॥

नित्यं सर्वदैकरूपं वृद्धिरहितमित्यर्थः ॥ अव्ययं अपक्षयशून्यं र

तस्य तुलयो नास्तीत्याह न तस्येति ॥ कालावयवैः अहोरात्रादिभिः ॥ गुणाः भावविकाराः परिणामः विपरिणामः ॥ अव्यक्तं अस्तित्वे विकारशून्यं सर्वस्य हेतुः कारणमिति ॥ १८ ॥ किंच वागादिगोचरस्य सविशेषस्य विकारा भवंति इदं तु न तथेत्याह ॥ नयत्रेति द्वाभ्यां ॥ लोककल्पः लोकरूपः सन्निवेशो रचनाविशेषः ॥ १९ ॥

+ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् ॥ २२ ॥ +

न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं ॥ १८ ॥ न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ १९ ॥ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनंति ॥ २० ॥ लयः प्राकृतिको ह्येषः पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः ॥ २१ ॥ ॥ ॥ ॥

स्वप्नजाग्रत् स्वप्नजागरावस्थायुक्तं सुषुप्तवत् इंद्रियाभावात् ॥ शून्यसादृश्ये हेतुः अप्रतर्क्यं । निपुनः शून्यमेवेत्याह तदिति ॥ २० ॥ [illegible]त्याहेति उपसंहरति लय इति शक्तयः सत्वादयः ॥ २१ ॥ ॥ ॥ आत्यंतिकं लयमाह । बुद्धींद्रियेति द्वादशभिः । आत्यंतिको लयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः ॥ न प्रपंचस्यात्मवस्तुत्वे लयः संभवतीति ज्ञानरूपाद्पृथग्भूतत्वात् तस्यासत्वमुपपादयति । बुद्धि श्रवरिंद्रियाणि

मा० द्वा०

१५

+ नत्र व्यतिरेके दृष्टांतेन प्रपंचयति दीपइति। दीप चक्षुरूपाणां तेजोविशेषाणां यथा तेजसो न व्यतिरेकः त

यदा तु बुद्धेरसत्त्वं तदा तदवस्थानां सुतरामसत्त्वमित्याशयेनाह बुद्धेरिति॥ ननु विश्वतैजसप्रज्ञानां एता

अवस्था न बुद्धेरित्याशंक्याह मायामात्रमिति इदं विश्वतैजसप्राज्ञरूपं॥२४॥ आद्यंतवत्त्वादित्यस्य हेतोरसि

द्धिमाशंक्य सावयवत्वेन साधयति॥ यथेति अवयवीति॥ यस्मात् सावयवं तदाद्यंतवत् घटादिवदित्यर्थः॥ अत

उदयाप्ययात् आद्यंतवत्त्वाद्विश्वं सन्न भवतीत्यर्थः॥ यद्वा पृथगेवागमापायित्वात् विश्वं मिथ्या ब्रह्म तु तदव

दीपचक्षुश्चरूपं च ज्योतिषो न पृथग्भवेत्॥ एवं धीः स्वात्मिमात्राश्च न स्युरन्यतमाद्दतात्॥२३॥

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते॥ मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि॥२४॥ यथा

जलधराव्योम्नि भवंति न भवंति च॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात्॥२४॥ सत्यं ह्यवय

वः प्रोक्तः सर्वावयविनामिह॥ विनार्थेन प्रतीयेरन् पटस्येवांग तंतवः॥२५॥ ७॥ ७॥

रज्जुसर्पवदिति

धित्वात् सत्यमित्यनेन साध्ये तदृष्टांतस्तु पूर्वोक्त एव॥ यथा जलधराव्योम्नीति दृष्टांतस्त्वागमापायित्व दव

धित्व मात्रेण न तु मिथ्यात्वे इति॥२४॥ अन्यतमाद्दतादिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति सत्यं हीति॥

अवयवः कारणं प्रोक्तः॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभिः॥ अत्र युक्तिमपि द

र्शयति विनेति। अंग हे राजन् हि यस्मात् अर्थेन अवयविना विना पृथगेव अवयवाः प्रतीयेरन्॥ यथा पट

मादिति। कार्यात् असेतव्यतिरिक्तात् ब्रह्मणः प्रपंचात् ब्रह्मणोस्ति व्यतिरेकः प्रपंचस्य तु ततो नास्ति व्यति

मा० द्वा०

स्यावयवाः तंतवः पटात्पृथक् प्रतीयंते तद्वदिति ॥२५॥ ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत सत्यं तदपि नातीव सत्यमित्याह यदितिसामान्यं कारणं विशेषः कार्यं तद्रूपेण ।अन्योन्यापाश्रयत्वात् परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि यस्यारोपितत्वादाद्यंतव

यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तुयत् ॥२६॥ विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा ॥ न निरूप्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥२७॥॥

त तत्सर्वमेवास्तीत्यर्थः ॥ यद्वा तच्चैव हेत्वंतरमे तत् ॥ य दुपलभ्येत स भ्रमः ॥ सामान्यविशेषरूपत्वात् स्वप्नवत् ॥ अन्योन्यापाश्रयादि ती दंपि हेत्वंतरं ॥ गुणगुणि विशेषण विशेष्यैर्व्यापकत्वादिरूपेण परस्पराधीन सिद्धत्वात्तथाभूतं स्वप्नवदिति निगमनं ॥ अतो यदाद्यंतवत् तत्सर्वमवस्त्विति ॥२६॥ तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्वं प्रसाधितं ॥ तत्र शंका ॥ ॥ ननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत् सत्वं किन्न स्यादितितत्राह विकार इति ॥ ख्यायमानः प्रकाशमानोपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं विनाणुमात्रोपि न निरूप्योस्ति । तं विना निरूप्यः स्याच्चेत् तर्हि सोपि चित्समः स्यात् चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् ॥ तथा च सति सोप्यात्मवत्स्यात् एकरू[illegible]पः स्यात् इत्यर्थः ॥२७॥

बम

भावत

कुतइत्यतआहनहीति॥ननुसत्यस्यात्मनोजीवब्रह्मरूपेणनानात्वंमस्त्येवतत्राह॥यद्येवंनानात्वंमन्येत नह्यवि
द्वान्कथंतर्हितयोर्भेदव्यवहारःउपाधिकृतइत्याहनोत्वमिति॥नत्रच्छिद्रयोर्घटाकाशमहाकाशयोरिवेति
परिच्छेदापरिच्छेदेदृष्टांतः॥ज्योतिषोआकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारसदसद्भावैर्बाह्यश
रीरस्थवाय्वोरिवेतिक्रियाभिर्भेदैर्वसुधाकटककुंडलादिरूपेण वातयो
र्भेदे॥२८॥ब्रह्मणएवप्रपंचव्यवहारालंबनत्वंदृष्टांतेनस्पष्टयति॥यथेति॥क्रियाभिःनतनरचना

नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते॥नानात्वंछिद्रयोर्यद्वत्ज्योतिषोर्वातयोरिव॥२८॥यथा
हिरण्यंबहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु॥एवंवचोभिर्भगवानधोक्षजोऽव्याख्यायते
लौकिकवैदिकैर्जनैः॥२९॥

लौकिकवैदिकैर्वचोभिः॥जनैःअहंकारोपहितैः॥२९॥ ॥छ॥ छ॥ छ॥

नन्वहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वं स्वस्य स्वकारणभूत ब्रह्मावरकत्वासंभवात्॥ आवरणे वा स्वस्यापि प्रकाशाभावादित्याशंक्य सदृष्टांतमाह यथेति॥ अर्कररश्मय एवमेघरूपेण परिणता वर्षंति॥ अग्नौ प्रास्ताहुतिः॥ सम्यक् आदित्यमुपतिष्ठति॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिवचनात्॥ तस्मादर्कप्रभवः अर्केणैव दर्शितः प्रकाशितश्च तमःस्वरूपभूतार्कदर्शनप्रतिबंधको भवति॥ अहं अहं

यथा घनोर्कप्रभवोऽर्कदर्शिनोऽस्यार्कांशभूतस्य च चक्षुषस्तमः॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्याऽत्मन आत्मबंधनः॥३०॥ घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत्॥३१॥ ॥ ॥

कारः ब्रह्मगुणः ब्रह्मकार्यभूतः तदीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्य आत्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति॥३०॥ अतएवाहंकारनाशे ~~अनुस्मरेत् ब्रह्माहमिति~~॥ स्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह घन इति आत्मन उपाधिः जिज्ञासया विचारेण तर्हि तदा अनुस्मरेत्॥ ब्रह्माहमिति पश्यतीत्यर्थः॥३१॥

१७

यदेवमिति

सोयमात्यंतिकः प्रलय इत्युपसंहरति ॥ विवेकहेतिनाज्ञानशस्त्रेण अहंकरणमेवात्मबंधनं अच्युतं परिपूर्णमात्मा
नं मनुभवतीत्यर्थः ॥३२॥ नित्यप्रलयमाह नित्यदेति ॥ ३३ ॥ कुत इत्यत आह कालेति ॥ परिणामिनां नदीप्रवाह प्रदीप
ज्वालादीनां या उच्चनीचावस्थाः ताः कालरूपास्रोतसो वेगेनाहन्यमानस्य देहादेर्दृश्यमानाः तद्वदेव नित्यदा
जन्मप्रलयहेतवो भवंति ॥३४॥ देहः प्रतिक्षणं प्रध्वंसी प्रतीक्षणं अवस्थाभेदस्य विद्यमानत्वात् प्रदीपादिव

यदेवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं ॥ छित्वाच्युतात्मानुभवोवतिष्ठेतेनमाहुरात्यंतिक
मंगसंप्लवं ॥३२॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥३३॥
कालस्रोतोजवेनाहन्यमानस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ ३४ ॥ अना
द्यंतवतानेन कालेनेश्वरमूर्तिना ॥ अवस्था नैव दृश्यंते वियति ज्योतिषामिव ॥३५॥ ॥छ॥छ॥छ॥

दित्यनुमानं ॥३४॥ यदि प्रतीक्षणं अवस्था भवंति तर्हि किं न दृश्यंते ॥ अतो हेतुरसिद्ध इत्याशंक्याह अनाद्यंतवता
कालेन जायमाना अवस्था नैव लक्ष्यंते आकाशे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषाः यथा नैव लक्ष्यंते

१७

तद्वत् अतो यथा तेषां प्रदेशांतरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यंते। तद्वद् आत्मनोऽपि बाल्यतारुण्यादिदर्शनेन मध्यवर्त्तिन्यो ऽवस्थाः कल्प्यंत इति न हेतुरसिद्ध इत्यर्थः॥ ३५॥ ॥उपसंहरति नित्य इति पुराणार्थमुपसंहरति एता इति लीलाविषयाः कथाः अजो ब्रह्मापि कात्स्न्येन नाभिधातुं नेशः ३६ ननु यदि साकल्येनाभिधातुं न शक्यंते तर्हि किं तदभिधानेन तत्राह संसारे ति विविधं दुःखमेव दवो दावानलस्तेनार्द्दितस्य पीडितस्य अतउत्तीतीर्षोः पुंसः भगवतो या लीलास्तासां कथाः तासां रसस्तन्निषेवणमंतरेणान्यः प्लवस्तरणसाधनं न भवेत्॥ उपायांतरासंभवात्॥ तत्कथा

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः॥ आत्यंतिकश्च कथितः कालस्य गतिरीदृशी॥ ३६॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्वधाम्नः॥ लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः॥ ३७॥ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य॥ लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्द्दितस्य॥ ३८॥ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः॥ ३९॥ स वै मह्यं महाराज भगवान्बादरायणः॥ ॥इमां भगवतीं प्रीतः संहितां वेदसम्मितां॥ ४०॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये॥ दीर्घसत्रे कुरुश्रेष्ठ सपृष्टः शौनकादिभिः॥ ४१॥ ॥ ॥इति श्रीभागवते० द्वाद० चतुर्थोध्यायः॥ ४॥ ७॥ ७॥ ७॥ ❋

श्रवणमेव यथाशक्ति निषेव्यमित्यर्थः॥ श्रोतुः नारदादारभ्य संप्रदायप्रवृत्तिमाह पुराणसंहितामिति त्रिभिः॥ स वै

१८

बादरायणः प्रीतः सन्महत्यमिमां संहितां प्राहेति पूर्वेणान्वयः॥ असौ सूत इति पुरतः स्थितमंगुल्या निर्दिश्याह॥ नैमिषालये नैमिषारण्यस्थाने॥ द्वादशे चतुर्थोध्यायः॥४॥ ॥ ७॥ ७॥ ७॥ ७॥ ७॥

पंचमे तु समासेन परब्रह्मोपदेशतः॥ राज्ञः स्तक्षकसंदंशो न्मृत्युभीति निवारणं॥ एतत्पुराणं श्रण्वन्नभयं प्राप्नोतीत्यभिप्रेत्य पुराणार्थमनुस्मारयति॥ ॥अत्रेति॥ अभयं भावः॥ जगतः कर्त्ता ब्रह्मापि यस्य प्रसादजः॥ प्रसादो त्ररजोवृत्ति र्हर्षः॥ ततो जातत्वान्नत्परतंत्रः सर्वसंहर्त्ता रुद्रश्च यस्य क्रोधसंभवो न तु स्वतंत्रः स विश्व

॥श्रीशुक उवाच॥ ॥अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवान् हरिः॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः॥१॥ त्वं तु राजन् मरिष्येति पशुबुद्धिमिमां जहि॥ न जातः प्रागभूतोद्य देहवत् त्वं न नंक्ष्यसि॥२॥ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान्॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः॥३॥ ॥७

स्यात्मा नियंता भगवानत्रानुवर्ण्यते॥ अत एवंभूतं भगवंतं श्रण्वतः कुतोन्यस्माद्भयशंकेति॥१॥ त्वं पुनः कृतार्थ एवे त्यनुस्मारयति त्वं त्विति॥ पशुबुद्धिं अविवेकं यस्मान्न नंक्ष्यसि॥ कुत इत्यत आह न जात इति॥ यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति च॥ न चैवं त्वं पूर्वं नाभूः न चाद्य जातोसि अतो न नंक्ष्यसि॥२॥ ननु बीजादंकुरवत् स्वस्मात् पुत्ररूपेण स्वयमेव भवति॥ यथाह श्रुतिः अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रनामा

१८

35

सीस जीव शरदः शतमिति ॥ ततः पुनरंकुराद्बीजमिव पौत्ररूपेण पिस्वयमेव भवति ॥ पिता पुत्रेण पितृमान्योनियोना विति श्रुतेः अतस्त्वेषु नश्यत्सु कथं न नंक्ष्यामीति चेत्तत्राह न भविष्यसीति ॥ भूत्वा पुत्रपौत्रादिरूपवान् बीजांकुरवन्न भविष्यसि ॥ यस्माद्देहाद्दर्यति रिक्तस्त्वं यथाऽनलः काष्ठात् ॥ देहाद्देहो जायते नात्मेति भावः ॥३॥ ॥

स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥४॥ घटे भिन्ने यथाकाश आकाशं स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥५॥ मनः सृजति वै देहान् गुणान् कर्माणि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥६॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥७॥ रजःसत्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ न तत्रात्मा स्वयंज्योति ॥र्यो व्यक्ताव्यक्तयोः परः ॥८॥ ॥

जन्मादीनां देहधर्मत्वं दृष्टांतेन प्रपंचयति ॥ स्वप्ने यथात्मनः शिरश्छेदं स्वयं पश्यति एवं जागरणेपि यस्माद्देहस्य पंचत्वादिकं पश्यति । ततस्तद्देवात्मन इदं भ्रममात्रं ॥ वस्तुतस्त्वात्माऽजोऽमरश्चेत्यर्थः ॥ तदुक्तं आत्मनः पितृपुत्राभ्यामनुमेयो

१९

नवाप्ययो ॥ न नवाप्ययवस्तु नामकिंञ्चिद्द्वयलक्षण इत्यादि ॥ यस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमः ॥ तस्मात् उपाधिनिवृत्तौ मुच्यत इति सदृष्टांतमाह ॥ घट इति ॥ यथा पुरा घटोपाधेः पूर्वमिव ॥ पुनर्घटे भिन्ने तदन्तर्वर्तिआकाश आकाश एव स्यात्तथा ॥ एवं देहे मृते तत्त्वज्ञानेन लीने ति ॥ ज्ञानेन लयं संभावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबंधप्रकारमाह मन इति मन आत्मनो देहादीन् सृजति ॥ तच्च मनो माया सृजति ॥ ततो मायाद्युपाधिसमुदायात् ॥ एतदेव सदृष्टांतमाह ॥ सार्द्धेन स्नेहेति ॥ दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म ॥ तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः ॥ अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसार इतियोज्यं ॥ देहकृतः देहनिबंधनः यद्वा देहकृतो मनसः चात्मनः अतो दीपवत्संसार एव नश्यति ॥ न त्वात्मा ज्योतिर्वदित्याह नेति नतु तत्र प्रतीयमानः आत्मा कुत इयत आह अयइति ॥ व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अन्यः अतः स्वयंज्योतिः ॥ ७ ॥

॥ आकाशइवचाधारो ध्रुवोनंतोपमस्ततः ॥ ८ ॥

परत्वं प्रपंचयति ॥ आकाशइवेति ॥ आधारो देहादेः प्रपंचस्य ॥ ध्रुवो निर्विकारः ॥ नास्त्यंत उपमा च यस्य सोनंतोपमः ततो विभुः ॥ ८ ॥ ॥ ७ ॥ ७ ॥ ७ ॥

१९

(37)

अतस्त्वमेव विचिंतयेत्याह एवमिति ॥ आत्मस्थं देहाद्युपाधिस्थितं ॥ आमृश विचारय ॥ अनुमानगर्भिण्या दृष्टदृश्यान्वयव्यतिरेकयुक्त्या ॥ ९ ॥ एवं च सति त्वां तक्षको न दहेदित्याह चोदित इति ॥ नत्वेक्षेत तवमृत्यवइति ॥ मृत्योहेतवः ॥ १० ॥ विमर्शप्रकारं दर्शयन् तक्षकादर्शनं दर्शयति द्वाभ्यां ॥ योहंस ब्रह्मैव यद्ब्रह्म तदहमेवेति समीक्षन् तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः ॥ ब्रह्माहमिति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यतिहारो दर्शितः ॥ निष्कले निरूपाधौ आत्मनि ब्रह्मणि ॥ ११ ॥ विषयुक्तैराननैर्दशंतं ग्रसंतं तक्षकं लेलिहानं जिह्वाभिरोष्ठप्रांतं सनिष्ठ्यपन्ना

एवमात्मानमात्मस्थमात्मनैवामृशप्रभो ॥ बुध्यानुमानगर्भिण्या वासुदेवानुचिंतया ॥ ९ ॥ चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं ॥ १० ॥ अहं ब्रह्म परं धाम ब्रह्माहं परमं पदं ॥ एवं समीक्ष्यन्नात्मानमात्मन्याधाय निष्कले ॥ ११ ॥ दशंतं तक्षकं पादे लेलिहानं विषाननैः ॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ एतत्ते कथितं तात यथात्मा पृष्टवान् नृप ॥ हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ १३ ॥ ॥ इति श्री भागवते० ॥ ब्रह्माण लक्षणं पंचमोध्यायः ॥ ५ ॥ ७ ॥ ७ ॥ ७ ॥

स्वादयतं ॥ आत्मनः पृथक् ॥ १२ ॥ हरेश्चेष्टां आत्मात्वं य पृष्टवान् ॥ तदेतत्ते कथितं ॥ शिष्यस्य तत्तार्थतापरीक्षणाय पृच्छति किमिति ॥ १३ ॥ ॥ द्वादशे पंचमः ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

३४

षष्टे ॥ परीक्षितो मोक्षः सर्पर्ध्दितो मा दिततत्स्कतान ॥ वेदशाखा विभागोक्तो त्रिचे दृव्यासवर्णितं ॥ एतत्पुराणं निशम्य निखि लात्मा हरिस्तं पश्यति ॥ निखिलं चात्मनि पश्यतीति तथा तेन ॥ अतः समेन ॥ नतेन अवनतेन मूर्द्धा तत्पादतलमुपसृत्य तत् स्यपादौ शिरसि निधाय स्वर्थः ॥ सिद्धं कृतार्थोऽस्मि ॥ यतः अनुगृहीतोऽस्मि ॥ अनुग्रहमेवाह ॥ यत्सु यस्मात् श्राविता च शब्दात् प्राप्तिसाधनं च करुणात्मता मनिनं दति ॥ द्वाभ्यां नात्यद्भुतमिति ॥ अश्रौषम् श्रुतवं नः भवतः सकाशात् ॥ ४ ॥ सिद्धोस्मी स्फक्तं तदेवाविः करोति भगवन्निति ॥

॥ सूत उवाच ॥ ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादपद्ममु ॥ पसृत्य नतेन मूर्द्ध्ना बद्धांजलिस्तमिद माह स विष्णुरातः ॥ १ ॥ ॥ राजोवाच ॥ सिद्धोस्म्यनुगृहीतोस्मि भ ॥ वता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनां ॥ ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयं ॥ यस्यां खलूत्तमश्लोको ॥ भगवाननुवर्ण्यते ॥ ४ ॥ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं ॥ प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ॥ ॥ ५ ॥ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रविश्य विसृजाम्यसून् ॥ ६ ॥ ७ ॥

यतः त्वया दर्शितं ब्रह्म प्रविष्टः कथंभूतं अभयं यतो निर्वाणं कैवल्यरूपं ॥ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्र सिद्धोहं न किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह अनुजानीहीति ॥ वाचं निःस्फुपलक्षणं सर्वेंद्रियाणां ॥ वाचं नि

ग्नंम्यकिंकरिष्यसितदाह।।मुक्ताःकामाशयास्तदासनायेनतच्चेतअधोक्षजेप्रवेश्यअसून्विसृजामि।। ।।ननु
किंप्र णायोगेनकंचित्कालंज्ञाननिष्ठोभवेतिचेत्तत्राहअज्ञानंचेतिचकारान्नसंस्काराश्च।।तच्चत्वत्कृपयैवेय
त्नभवेति।।६।।७।।८।।आत्मनाबुध्याआत्मानंमनःआत्मनिप्रत्यक्प्रकाशेसमाधायपरमात्मानंदध्यौअस्पंदासुः
लीनप्राणःयथातरुःस्थाणुः।।९।।तमेवविशिनष्टि।।प्राक्कूलेप्रागग्रेबर्हिषिदर्भे।।तदेवंब्रह्मभूतेतस्मिन्त

अज्ञानंचनिरस्तंमेज्ञानविज्ञाननिष्ठया।।भवतादर्शितंक्षेमंपरंभगवतःपदं।।७।। ।।सूतउवाच।।इत्युक्तस्त
मनुज्ञाप्यभगवान्बादरायणिः।।जगामभिक्षुभिःसाकंनरदेवेनपूजितः।।८।।परीक्षिदपिराजर्षिरात्मन्या
त्मानमात्मना।।समाधायपरंदध्यावस्पंदासुर्यथातरुः।।९।।प्राक्कूलेबर्हिष्यासीनोगंगाकूलउदङ्मुखः।।
ब्रह्मभूतोमहायोगीनिःसंगःछिन्नसंशयः।।१०।।तक्षकःप्रहितोविप्राःक्रुद्धेनद्विजसूनुना।।हंतुकामोन
पंगछन्ददर्शपथिकश्यपं।।११।।तंतर्पयित्वाद्रविणैर्निवर्त्यविषहारिणं।।द्विजरूपप्रतिछन्नःकामरू
।।पोदशन्नृपं।।१२।। ।।७।।७।।७।।

क्षकागमनादिकंपिष्टपेषणमिवाभवदितिदर्शयति।।तक्षकइतित्रिभिः।।१०।।हेविप्राःतंविषचिकित्सयापरीक्षि
द्रक्षणेनद्रव्यार्जनायागच्छंतं।।११।।तत्रस्थालीढवटवृक्षस्यभस्मीभूतस्यपुनरंकुरादिक्रमेणोत्थापनाद्विषहारिणं।।त
।।दपेक्षिद्रविणैःसंतर्प्यततोनिवर्त्यद्विजरूपेणतिरोहितःसन्दशत्।।१२।।

२१

तच्चपुत्रदुःखमिव जातमित्याह ब्रह्मभूतस्येति ॥१३॥ तत्क्षणं सर्वेषां दुःखं च ततः परमुत्सवं चाह द्वाभ्यां हाहाकार इति ॥१४॥१५॥ प्रासंगिकमाह जनमेजय इत्यादि ॥ सर्पाभिचारसत्रे द्विजैः सह वर्त्तमानः यथावदाजुहाव ।

ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां ॥१३॥ हाहाकारो महानासीत् भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन् सर्वे देवासुरनरादयः ॥१४॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ॥ ववर्षुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥१५॥ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं ॥ यथाजुहाव संक्रुद्धो नागान् सत्रे सह द्विजैः ॥१६॥ सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान् ॥ दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥१७॥ अपश्यंस्तक्षकं तत्र राजा पारिक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥१८॥ तं गोपायति राजेंद्र शक्रः शरणमागतं ॥ तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥१९॥ ॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥

जुहावेति वा ॥ सर्वसर्पावाहने कारणमाह संक्रुद्ध इति ॥१६॥१७॥ कस्मात्तक्षको न दह्येतेत्युक्ताः संतो द्विजा ऊचुः ॥ तमिति । तेन इंद्रेण असौ सर्पः ॥१९॥ ॥७॥७॥७॥७॥७॥

२१

भा०द्वा०

ऋत्विजः प्रतिप्राह । सेंद्रः इंद्रसहितः किमिति न पात्यते ॥ २० ॥ तद्राज्ञो वचः श्रुत्वा आजुहुवुः साक्षेपमाक्रानंदयंती यति ॥ इहागच्छ पतमरुत्वतामरुद्गणवताइंद्रेणसह ॥ २१ ॥ ब्राह्मणोरुक्तेराक्षेपैः परुषवाक्यैः सतक्षकः ॥ २२ ॥ अंगिरसः पुत्रो बृहस्पतिः प्राह ॥ २३ ॥ ४ ॥ भवतु नाम जरामरः ॥ नथापि पितृमारकं चक्ष्यामीति चेत्तत्राह जीवितमिति ॥ गतिः परलोक अतो दुर्मरणनिमित्ता पितुर्दुर्गतिरनेन कृतेत्यपि न शोकनीयमित्यर्थः ॥ २५ ॥ कथमन्यः

पारिक्षित इति श्रुत्वा प्राह त्विज उदारधीः ॥ सेंद्रं द्रस्तक्षिको विप्रा नाग्नौ किमिति पात्यते ॥ २० ॥ तच्छ्रुत्वाजुहुवुर्विप्राः सेंद्रं द्रंतक्षकं मखे ॥ तक्षकाशु पतस्वेह सेंद्रेण मरुत्वता ॥ २१ ॥ इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रांतमतिः सविमानः सतक्षकः ॥ २२ ॥ तं पतंतं विमानेन सहतक्षकमंबरात् ॥ विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥ २३ ॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतं अथवा अजरामरः ॥ २४ ॥ जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोन्यो नान्यस्य प्रदाता सुखदुःखयोः ॥ २५ ॥ सर्पचोराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्ते आरब्धकर्म तत् ॥ २६ ॥ ॥ ७ ॥

सुखदुःखप्रदाता नास्ति ॥ सर्पादीनामुपलंभ्नत्वादिति चेत्तत्राह ॥ सर्पादिना जंतुः पंचत्वं मृत्युं ऋच्छति प्राप्नोतीति यत् तदारब्धं कर्मैव भुंक्ते स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः ॥ २६ ॥ ॥ ७ ॥ ॥ ७ ॥

सस्त्रीयेतसमाप्यतां। अभिचारकं फलं हि सा फलं ॥२७॥ दिष्टं प्राचीनं [illegible] कर्म। अतः सर्पादिष्ट प्रयुक्तस्यतवाप्ययं नापराधइतिभावः॥२७॥ वाक्पतिं बृहस्पतिं॥२८॥ ननु कथं विदुषामप्येवं संमोहः॥ यतो ब्रह्मनकोपा त्सरी। क्षिते [illegible] जनमेजय कोपात्सर्पाणामित्यादितत्राह सैषेति॥ तस्यामहत्त्वं दर्शयति॥ अलक्ष [illegible]णानलक्ष्यतइत्यलक्ष

तस्मात्सत्रमिदं राजन् संस्त्रीयेताभिचारकं॥ सर्पा अनागसोदग्धा जनैर्दिष्टं हि भुज्यते॥२७॥ इत्युक्तः सतथेत्या ह महर्षेर्मानयन् वचः॥ सर्प [illegible] सत्रादुपरतः पूजयामास वाक्पतिं॥२८॥ सैषा विष्णो र्महामायाऽबाध्यालक्षणायया॥ मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः॥२९॥ नयत्रदंभीत्यभया विरा जिता माया त्मवादेऽसहृदात्मवादिभिः॥ नयद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्तियत्॥३०॥

[illegible]णा अप्रतर्क्येत्यर्थः॥ कासा वित्यत आह। यया ऽस्य विष्णोरेव आत्मभूताः आत्मांश [illegible] भूताः॥ प्राणिनः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु मुह्यंति बाध्यबाधकतां व्रजंतीत्यर्थः॥ ननु श्रवणादिनाबाधितया कुतो मोहः स्यात्तत्राह अबा ययाबाधितुमशक्यया॥२९॥ कथं तर्हि मायातत्कार्यनिवृत्तिः स्यादाशंक्यश्री विष्णु स्वरूपनिरूपणपूर्वकं तद्भजनात्

४३

भा० द्वा०

कृ.

सर्वानर्थनिवृत्तिरितिशास्त्रमुपसंहरति ॥ नयत्रेति पंचभिः ॥ दंभीतिया मायाकपटत्वानयंपुमानित्येवंभूतायोबुद्धावस
त्तु दुर्लक्ष्यमाना ॥ माये त्यर्थः ॥ सा आत्मवादे क्रियमाणे आत्मवादिभिर्यत्रा भयानविराजिता न प्रकाशिता ॥ किं तुमीते
वस्वकार्यमोहादिकमेव र्धतीकथं चितत्वर्त्तत इति प्रतिपादितेत्यर्थः तदुक्तं तस्मै नमो ऽ भगवते वासुदेवाय [illegible]
धीमहि ॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थंते
ममाहमिति दुर्धिय इति ॥ किंच ॥ यद्यस्मिन् तदा श्रयो मायाश्रयो विविधो वादो पि नास्ति ॥ विशेषविषयत्वाद्विवादानां तस्य
च विशेषातीतत्वादिति भावः ॥ संकल्पविकल्पावृत्तयो यस्य तन्मनो पि यत्र नास्ति ॥ संकल्पविकल्पानामपि विशेष

नयत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवः स्त्रिभिरन्वितस्त्वहं ॥ तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मी
न्विरमेत्स्वयं मुनिः ॥ ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

विषयत्वात् ॥ ३० ॥ ॥ ॥ ॥ किंच सृज्यं कर्म्म सृजता कारकवर्गेण सह ॥ उभयोः सृज्यस्त्रष्ट्रोः परं साध्यं श्रेयः फ
लमपि ॥ अतः सृज्यस्त्रष्टृफलैरन्वितो जीवश्च अहंकारात्मको यत्र नास्ति ॥ अत उ सा[illegible] न्निषिध्या विरमेत् ॥ वि
शेषेण क्रीडेदित्यर्थः ॥ दितो निरस्तो बाध्यबाधको यस्मिन्तदेतत् ॥ स्वयं आत्मस्वरूपमित्यर्थः तत्तस्मिन् ऊर्मीन्
अहंकारादीन्निषिध्य विरमेत् विशेषेण क्रीडेदित्यर्थः ॥ ३१ ॥ ॥ ॥

२३

यतस्तद्वैल्लवंपदमामनंतीसा॥ परमिति॥यदेतत्तदेवपरंवैल्लवंपदंस्वरूपमामनंति॥के॥अतत्॥आत्मव्यतिरिक्तं उत्सिसृक्षवः त्यक्तुमिच्छवः॥यतः अनन्यसोहृदाः नास्ति अस्मिन्सोहृदं ~~यस्ति॥अन्न स्यक्तु~~मिच्छयेषां ते कुतः॥देहात्मदे हो॥यत्तंभावं विसृज्य देहे अहंकाराभावादन्यच सोहृदं नास्ति॥अतस्त्यक्तुमिच्छव इत्यर्थः॥

परंपदं वै छ्वमामनंति तत्यन्नेतिनेतीयतदुत्सिसृक्षवः॥विसृज्यदौरा त्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः॥३२॥त एतदधिगच्छंति विष्णोर्यत्परमंपदं॥अहंममेति दौर्जन्यंन येषांदेहगेहजं॥३३॥अतिवादांस्तितिक्षेत नावमन्येतकंचच॥नचेमंदेहमाश्रित्य वैरं कुर्वीतकेनचित्॥३४॥नमो भगवते तस्मै ह्लल्लायाकुंठमेधसे॥यत्पादांबुरुहध्यानात् संहितामध्यगामिमां॥३५॥ ७॥

कथं नेतिनेतीत्येवं अत्रविद्वदनुभवमपि प्रमाणयति हृदोपगुह्यध्यानादिना॥ततः समाहितैः रवसितं निश्चितं। यद्वा अवसितं अवबद्धं आत्मतया गृहीतमित्यर्थः॥३२॥एवं प्राप्तावधिकारिणो दर्शयति॥त एतदिति॥देहजमहमिति गेहजंममेति॥३३॥प्राप्त्युपायमाह॥अतिवादानिति॥३४॥शास्त्रसमाप्तौ गुरुं प्रणमति॥नम इति॥हल्लायव्यासाय॥अध्यगां अधिगतवानस्मि॥३५॥ ॥ ❀ ❀ ❀

२३

इमां संहितामध्यगामित्युक्तं तत्र पुराणसंहिताविभागं विशेषतो बुभुत्सुर्वेदविभागमपि प्रसंगात् पृथक् पृच्छति पैला
दिभिरिति ॥ हे सौम्य ॥ ॥३६॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह समाहितात्मन इत्यष्टभिः ॥ ब्रह्मणो हृदि य आकाशस्तस्मा
त्स्मान्नादोऽभूत् ॥ यः कर्णपुटविधाने श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ॥३७॥ प्रसंगान्नादोपासका

॥ शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च क[illegible]ति[illegible]धा व्यस्ता एतत्सौम्याभि
धेहि नः ॥३६॥ ॥ सूत उवाच ॥ ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्ति
रोधाद्विभाव्यते ॥३७॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुन
र्भवं ॥३८॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥३९॥ ७॥

नां मोक्षफलमाह ॥ यस्य नादस्योपासनया आत्मनो मलं धूत्वा अपोह्य कथंभूतं मलं तमाह ॥ द्रव्यमधिभूतं क्रिया
अध्यात्मं कारकमधिदैवं ॥ एवंविधा भूता आख्याऽस्येति तथा तं ॥३८॥ त्रिवृत् त्रिमात्रः ॥ कंठोष्ठादिभिः उच्चार्यमा
णस्योंकारस्याक्षरसमाम्नायान्तर्भावात् सूक्ष्मतया तं विशिनष्टि ॥ अव्यक्तात्प्रभवो यस्य सः तदेवाह ॥ स्वराट् स्वत एव
हृदि प्रकाशमानः तमेव कार्येण लक्षयति ॥ यत्तदिति ॥ नपुंसकत्वं लिंगशब्दविशेषणत्वात् ॥ लिंगं गमकम् ॥३९॥

२४

कोसौ परमात्मात्मा ह ऋणोतीति॥ इमं स्फोटं अव्यक्तमोंकारं ॥ ननु जीव एवतं शृणोत्विति नेत्याह॥ सुप्त श्रोत्रे कर्णपिधानादिना अवृत्तिके ऽपि श्रोत्रे सति॥ जीवस्य करणाधीनज्ञानत्वात् न तदा श्रोता तदुपलब्धिस्तु तस्य परमात्मद्वारिकैवेति भावः॥ ईश्वरस्तु नैवं॥ यतः शून्यदृक् शून्ये ऽपींद्रियवर्गे दृक् ज्ञानं यस्य तथाह॥ संसुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेंद्रियत्वात्॥ अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोधयति॥ स यथा परमात्मैवेत्यर्थः॥ को सावोंकारः तं विशिन

शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्॥ येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥ स्वधाम्नो ब्रह्मणः साक्षात् वाचकः परमात्मनः॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनं॥४१॥ ॥७॥ ७॥

ष्टि सार्द्धेन॥ येन वाक् ब्रह्मेतीति॥ व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिः अभिव्यक्तिः॥४०॥ किंच स्वधाम्नः स्वस्य श्रेयःकारणं यत् ब्रह्म तस्य किंच परमात्मांशभूत समस्त देवता वाचको ऽपीत्याशयेनाह स इति॥ सर्वमंत्राणामुपनिषद्रहस्यं सूक्ष्मं रूपमित्यर्थः तत्र हेतुः॥ वेदानां बीजं कारणं। बीजत्वे ऽप्यविकारितामाह। सनातनं सदैकरूपं॥ तस्य ब्रह्मरूपत्वात्॥४१॥ ॥ ॥७॥७॥ ७॥ ७॥ ॥७॥७॥

२५

इदानीं ततः सर्वप्रपंचोत्पत्तिप्रकारमाह ॥ तस्यहीति ॥ त्रय स्त्रिसंख्यायुक्ताः भावाः ॥ येरकारोकारमकारैर्धार्यंते तत्का
रणत्वात् ॥ तानेवाह ॥ गुणाः सत्वादयः नामानि ऋग्यजुःसामानि अर्था भूर्भुवः स्वर्लोकाः वृत्तयो जाग्रदाद्याः ॥ ४८ ॥ त
तस्तेभ्यो वर्णेभ्यः अक्षराणां समाम्नायं सामाहारं । तमेवाह ॥ अंतस्थाः यरलवाः ऊष्माणः सषसहाः । स्वराः अकाराद्याः
स्पर्शाः कादयः ह्रस्वदीर्घाश्च आदिशब्दात् जिह्वामूलीयादयः ॥ तएव लक्षणं स्वरूपं येषां तं ॥ ४९ ॥ विभुः चतुर्मुखस्व

तस्य ह्यासंस्त्रयो वर्णा अकाराद्यास्त्रयो गूढाः ॥ धार्यंते यैस्त्रयो भावा गुण नामार्थवृत्तयः ॥ ४० ॥ ततोऽक्षरसमाम्ना
यमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ॥ ४१ ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्
विभुः ॥ सव्याहृतिकान्सोंकारान्चातुर्होत्रविवक्षया ॥ ४२ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मको
विदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४३ ॥ ॥ छ ॥ छ ॥ छ ॥

रूपो भगवान् असृजदिति पूर्वस्यैवानुषंगः ॥ चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चतुर्होतारः तैर
नुष्ठेयं होत्राध्वर्यु चादिकं कर्म चातुर्होत्रं च तद्विवक्षया ॥ ४२ ॥ पुत्रान् मरीच्यादीन् तान्वेदान् ॥ ब्रह्म[illegible]कोविदान् वेदो
च्चारणादि निपुणान् ॥ ४३ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

२५

एवंचतुर्युगेषुप्राप्ताः द्वापरादौ द्वापरमादिर्यस्य तदंशलक्षणस्य कालस्य तस्मिन् ॥ द्वापरांते वेदविभागप्रसिद्धेः ॥ शंतनुस
मकालव्यासावतारप्रसिद्धेश्च ॥ व्यस्ता विभक्ताः ॥४४॥ तत्र हेतुः क्षीणायुषो जनान् तर्हि पुरुषबुद्धिप्रभवत्वात् अनादर
णीयं स्यादित्याशंक्याह हृदिस्थेति ॥४५॥ एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे विशेषतो निरूपयितुमाह ॥

ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेऽथ व्यस्ता द्वापरादौ महर्षिभिः ॥४४॥ क्षीणायुषः क्षी
णसत्वान् दुर्मेधान् वीक्ष्य कालतः ॥ वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतनोदिताः ॥४५॥ अस्मिन्नप्यंत
तेरे ब्रह्मन् भगवान् लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्म्मगुप्तये ॥४६॥ पराशरात्सत्यवत्यामं
शांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ॥४७॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥
चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥४८॥ तासां स चतुरः शिष्यान् उपाहूय महामतिः ॥ एकैकां संहितां ब्र
ह्मन्नेकैकस्मै ददौ विभुः ॥४९॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं
यजुर्गणं ॥५०॥ ॥ ॥७॥७॥७॥ ॥७॥ ॥७॥ ॥

अस्मिन्नपीति ॥४६॥ अंशो माया तत्स्यांश[illegible]ः तस्य कलया अं[illegible] अवतीर्णः सन् ॥४७॥ चातुर्विध्यमेवाह ॥ ऋगि
ति ॥ ऋगादिमंत्राणां राशीन् वर्गशः तत्तत्प्रकरणभेदेनोद्धृत्य यथाऽनेकविधमणिराशेर्मणिगणाः पद्मरागादयो वि
विविच्योद्ध्रियंते तद्वदुद्धृत्य तैर्मंत्रैश्चतस्रः ऋगादिसंहिताश्चक्रे ॥४८॥ ॥७ ॥ ७॥ ७॥

२५

तासां संहितानां मध्ये ऐकैकां ॥४९॥ ऋक्समुदायरूपत्वात् बह्वृचाख्यां। प्रश्लेषेणगद्यमानत्वान्निगदाख्यां ॥५०॥ छंदस्सुगीयमानत्वात् छंदोगाख्यां संहितां ॥५१॥ तत्र ऋग्वेदेशाखाविभागमाह ॥ पैलइति ॥ स्वसंहितां द्वेधा विभज्य इंद्रप्र[illegible] मितये बाष्कलाय चेपुचे ॥५२॥ स बाष्कलोपि स्वसंहितां चतुर्द्धा व्यस्य बोध्यादिभ्यः शिष्येभ्य आह हे भार्गव ॥५२॥ इंद्रप्रमितिरपि स्वसंहितां स्वसुतं मांडूकेयमध्यापयामास तस्य मांडूकेयस्य शिष्यो देवमित्रः ॥५३॥ तत्सुतः मांडूकेयसुतः शाकल्यः वात्स्या

साम्नां जैमिनये प्राह तथा छंदोगसंहितां ॥ अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ॥५१॥ पैलः स्वां संहितामूचइंद्रप्रमितये मुनिः ॥ बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां ॥५२॥ चतुर्द्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पाराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ॥५३॥ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥५४॥ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहितां ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥५५॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां ॥ व[illegible]लाकपैजवैताल विरजेभ्यो ददौ मुनिः ॥५६॥ ॥ ॥ ॥ ॥ ॥ ॥

दिषु च पंचस्वधात् ॥ तानध्यापयामासेत्यर्थः ॥५४॥ तच्छिष्यः शाकलस्य शिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च बलाकादिभ्यश्चतुर्भ्यो ददौ ॥५६॥ ॥ ॥

बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः बालायन्यादयस्तामादधुः अधीतवंतः ॥ ५६ ॥
ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह बह्वृचा इति ॥ एतच्छंदसां एतेषांछंदसां ॥ ५७ ॥ यजुर्वेदे तैत्तरीयशाखोत्पत्ति

बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां ॥ चक्रे बालायनिर्भज्यं काशारश्चैव तां दधुः ॥ ५६ ॥ बह्वृ
चाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ५७ ॥ वैशंपायनशिष्या
वै चरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः क्षपणं [illegible] स्वगुरोर्व्रतं ॥ ५८ ॥ याज्ञवल्क्यश्च तच्छिष्य
आहाहो भगवन्कियत् ॥ चरितेनाल्पसाराणां चरिष्येहं सुदुश्चरं ॥ ५९ ॥ इत्युक्तो गुरुरप्याह कुपितो याह्य
ह्यलं त्वया ॥ विप्रावमंत्रा [illegible] शिष्येण मदधीतं त्यजाश्विति ॥ ६० ॥ ॥ ७ ॥ ७ ॥

प्रस्तावमाह वैशंपायनशिष्या इत्यादिना ॥ चरकनाम [illegible] निरुक्तिमाह ॥ यस्माच्चेरुरिति ॥ ब्रह्महत्यारूपमंहः क्षपयतीति
तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणा [illegible] च्चरका इत्यर्थः ॥ ५८ ॥ तच्छिष्यो वैशंपायनशिष्यः अल्पसाराणामेतेषां चरिते
न कियत् ॥ सुदुश्चरमहं चरिष्यामीति ॥ ५९ ॥ विप्राणामवमंत्रा अवज्ञाकर्त्रा मत्तोऽधीतमाशु त्यजेति ॥ ६० ॥ ॥

देवरातसुतो याज्ञवल्क्यः॥ छर्दितस्यादानं विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वा आददुः॥ ततश्च तैत्तिरीया इति प्रसिद्धाः सुपेशला अतिरम्याः बहुवचनमवांतरभेदमिवक्षया॥ काण्वमाध्यंदिनादिशाखाप्रसंगमाह॥ याज्ञवल्क्य इत्यादिना॥ गुरोर्वैशंपायनस्य व्यासेन विभज्यानुक्त्वा अविद्यमानानि॥ अधिअधि कानिगवेषयन्सूर्यं तस्थे॥ सम्यक्तुष्टाव॥ ईश्वरं वक्ता छिन्नं वेदानां॥ तथा च श्रुतिः॥ ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे न तिष्ठति मध्ये अह्नः॥

नमु

देवरातः सोपि छर्दित्वा यजुषां गणं॥ ततो गते थमुनयो ददृशुस्तान्यजुर्गणान्॥ ६१॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः॥ तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः॥ ६२॥ याज्ञवल्क्यस्ततो ब्रह्मन्छंदांस्यधिगवेषयन्॥ गुरोरविद्यमानानि सूपतस्थे र्कमीश्वरं॥ ६३॥ याज्ञवल्क्य उवाच॥

सामवेदेनास्तमये महीयते॥ वेदैरशून्यस्त्रिभिरेति सूर्य इति॥ ६३॥ ॥७॥७॥७॥७॥ ॥

२६

नमो भगवते तुभ्यं आदित्याय यो भगवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः ।। तदेव दर्शयति अखिलजगतामात्मस्वरूपेणां तर्हृदयेषु कालस्वरूपेण बहिरपि वर्त्तमान इति ।। अखिलजगतामित्यस्य प्रपंचः ।। चतुर्विधेति ।। हृदयांतर्वर्त्तित्वेऽपि जीववत्तेनो पाधिनाऽव्यवधीयमानः अनाछाद्यमानः का ·लस्वरूपेनचेत्यस्य प्रपंचः ।। क्षणेति ।। क्षणलवादयो येऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन प्रत्यब्दमपामादानं शोषणं विसर्गो वृष्टिः ताभ्यां अनेन गायत्री प्रथमपादोक्त वरेण्यतानुवर्त्तिता ।। ६४ ।। ।।

ॐ नमो भगवते आदित्याया ऽखिलजगतामात्मस्वरूपेण च कालस्वरूपेण च चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानां अंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषा वयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ।। ६४ ।। यदु ह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमंडलम् ।। ६५ ।। ।। ।। ७ ।। ७ ।। ७ ।। ।। ७ ।। ।। ७ ।। ❀ ❀

द्वितीयपादार्थानुवर्णनेन स्तौति ।। यदु हेति ।। हे विबुधर्षभ हे सवितः यदप्यदो भगवतः स्तवमंडलं तपति तत्समभिधीमहि सम्यगाभिमुख्येन ध्यायेम पुनस्तस्यैव संबोधनं प्रत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां यान्यखिलानि दुरितानि तत्फलानि च वृजिनानि तेषां बीजमज्ञानं च तेषामवभर्जन विनाशक हे तपनेति ।। ६५ ।। ।। ७ ।। ७ ।। ७ ।। ❀

२०

(४३)

वे

तृतीयपादेन स्तौतियद्धृदंतियोभगवान् स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानांमनइंद्रियप्राणगणान् ॥ अनात्म
नोजडान् स्वयमात्मैवांतर्यामीसन्प्रचोदयतिप्रवर्त्तयति ॥ ६६ ॥ तृतीयपादमेवं मंडलस्थपरतया व्याचक्षाणस्तौति ॥
यएवेति ॥ यएकएवभगवान् अतिकरालवदनोयोंधकारसंज्ञोऽजगरग्रहस्तेन गिलितंअतएवमृतकमिवविचेतनं ॥
स्वधर्मारव्यंयदात्मावस्थानं प्रत्यक् प्रवणत्वं तदेवश्रेयस्तस्मिन् प्रवर्त्तयति किंचयोभवानवनिपतितिरिवाटतिगच्छति ॥ ६७ ॥

वा

यद्धृदैव स्थिरचरनिकराणांनिकेतनानांमनइंद्रियासुगणाऽननात्मनः स्वयमात्मांतर्यामीप्रचोदयति ॥ ६६ ॥ य
एवेमंलोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितंसमृतकमिवविचेतनमवल्लोक्याऽनुकंपयापरमका
रुणिक ईक्षयैवोत्थाप्याहरहरहरनुसवनंश्रेयसिस्वधर्मारव्यात्मावस्थाने प्रवर्त्तयत्यवनिपतिरिवासाधूनांभयमु
दीरयन्नटति ॥ ६७ ॥ परितआशापालेस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ॥ ६८ ॥ अथहभगवंस्तव
चरणनलिनयुगलेत्रिभुवनगुरुभिर्वंदितमहमयातयामयजुः काममुपसरामीति ॥ ६९ ॥ सूतउवाच ॥ एवं
स्तुतः सभगवान्वाजिरूपधरोहरिः ॥ यजूंष्ययातयामानिमुनयेऽदात्प्रसादितः ॥ ७० ॥ ० ॥ ० ॥

आशापालेरिंद्रादिभिः ॥ कमलकोशयुक्तैस्तत्तुल्यैर्वांजलिभिः उपहृतार्हणः दत्तार्घः ॥ ६८ ॥ यस्त्वएवंभूतस्तवं अथअतः
हस्फुटंअयातयामानिअन्यैर्यथावदविज्ञातानियजूंषितत्कामोऽहउपसरामिभजामि ॥ ६९ ॥ एवंस्तुतः प्रसादितश्च ॥
॥ ७० ॥

२८

पंचदशशाखायाः शेतरएरिमितैर्यजुर्भिरकरोत् ॥ सैतेरितिपाठेसएववयाज्ञवल्क्यःतेर्यजुर्भिरकरोदितिजगृह्ः अधीतवं
नः रविणाअश्वरूपेणवाजेभ्यः केशरेभ्यः ॥ वाजेनवेगेनवा ॥ सन्यस्तायत्ताः शाखाः वाजसनी संज्ञास्ताः शाखाइतिवा ॥
॥ ७१ ॥ सामशाखाविभागमाह ॥ जैमिनेरिति ॥ तत्सुतः सुमंतु सुतः ताभ्यां पुत्रपौत्राभ्यांक्रमेणैकेकांप्राह ॥ ७२ ॥ तच्छिष्यः

यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः ॥ जगृहुर्वाजिसन्यस्ताः काण्वमाध्यंदिनादयः ॥ ७१ ॥ जैमिनेः सामग
स्यासीत्सुमंतुस्तनयो मुनिः ॥ सुन्वांस्तत्सुतस्ताभ्यामेकैकांप्राहसंहितां ॥ ७२ ॥ सुकर्माचापितच्छिष्यः साम
वेदतरोर्महान् ॥ सहस्रसंहितामेदंचक्रेसाम्नांततो द्विज ॥ ७३ ॥ हिरण्यनाभः कौशल्यः पौष्यंजिश्च सुकर्मणः ॥
शिष्यौजगृहतुश्चान्यआवंत्योब्रह्मवित्तमः ॥ ७४ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

जैमिनेः शिष्यः महान् अतिमेधावीसहस्रसंख्यसंहितारूपंभेदंचक्रे साम्नांतंसंहिताभेदंततस्तदनंतरं ॥ ७३ ॥ सुकर्मणः
शिष्योएकःकौशल्योहिरण्यनामः पौष्यंजिनामेकः स्तौजगृहतुआवंत्यः अन्यः तस्येवशिष्यः सोपिजग्राह ॥ ७४ ॥ ॥ ७ ॥

२८

पौष्यंज्यावंसयोरपिचकाराद्धिरण्यनामस्यापिपंचशतानिशिष्याआसन् ॥ तेतावतीःशाखायथायथंजगृहुः ॥ तानुदीच्या
न्सतःकालतःकांश्चित्प्राच्यांश्चप्रचक्षतइत्यर्थः ॥ यथोक्तंवैष्णवे ॥ उदीच्याःसामगाःशिष्यास्तस्यपंचशतंस्मृताः ॥ हिरण्यना
भात्तावंत्यःसंहितायेर्द्विजोत्तमैः ॥ गृहीतास्तेपिचोच्यंते पंडितैः प्राच्यसामगाइति ॥ ७५ ॥ पुनरप्येतेषांत्रयाणांसुकर्मणःशि

उदीच्याःसामगाःशिष्याआसन्पंचशतानिवै ॥ पौष्यंज्यावंत्ययोश्चापितांश्चप्राच्यान्प्रचक्षते ॥ लोकाक्षिर्मा
गलिःकुल्यःकुशीदःकुक्षिरेवच ॥ पौष्यंजिशिष्याजगृहुःसंहितास्तेशतंशतं ॥ ७६ ॥ कृतोहिरण्यनाभस्यचतुर्विंशति
संहिताः ॥ शिष्यऊचेस्वशिष्येभ्यःशेषाआवंत्यआत्मवान् ॥ ७७ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधे
शाखाप्रणयनंनामषष्ठोध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ सूतउवाच ॥ ॥

ष्याणांशिष्यांतरैःशाखाबाहुल्यंदर्शयति ॥ लोकाक्षीति ॥ द्वाभ्यां ॥ ७६ ॥ कृतोनामहिरण्यनाभस्यशिष्यःस्वशिष्येभ्यःऊचे ॥
शेषाःअन्याअपियाःप्रसिद्धाःशाखाःताआवंत्यःस्वशिष्येभ्यःऊचेइति ॥ ७७ ॥ द्वादशेषष्ठः ॥ सप्तमेथर्वविस्तारःपुराणव्य
सनंततः ॥ पुराणलक्षणादीनिफलंभागवतश्रुतेः ॥ १ ॥ क्रमप्राप्तमथर्ववेदविभागमाह ॥ शिष्यंकबंधनामानंस्वकांस्व

२९ वै

कीयां संहितां ॥ सोपि शिष्यो पितां द्विधा विभज्य तदुक्तं वैष्णवे अथर्ववेदं समुनिः सुमंतुरमितद्युतिः ॥ शिष्यमध्यापयामास कबंधं सोपि तद्द्विधा कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति ॥ १ ॥ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यान् अध्यापयामास ॥ पथ्यश्च त्रिधा विभज्य त्रीनिति सार्द्धेन आह शौल्काय निरिति ॥ २ ॥ आंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च तदुक्तं ॥ शुनकश्च द्विधा कृत्वा ददावेकां तु बभ्रवे ॥ द्वितीयां संहितां प्रादात् सैंधवायन संज्ञिन इति ॥ सावर्ण्याद्याः सैंधवायनादी-

अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां ॥ संहितां सोपि पथ्याय वेददर्शाय चोक्तवान् ॥ १ ॥ शौल्कायनिर्ब्रह्मबलिर्मौदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ २ ॥ कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् ॥ बभ्रुः शिष्योऽथांगिरसः सैंधवायन एव च ॥ अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथापरे ॥ ३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः ॥ एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ शिंशपायन हारीतौ षड्वै पौराणिका इमे ॥ ५ ॥ अधीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ६ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ७ ॥

नां शिष्याः ॥ ३ ॥ नक्षत्रकल्पः शांतिकल्पश्चेति द्वौ ॥ तदुक्तं नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति ॥ नक्षत्रकल्पादीनां कर्तारस्तत्तन्नामभिरुच्यते ॥ ४ ॥ ५ ॥ मत्पितुर्मुखादिति प्रथमं व्यासः षट् संहिताः कृत्वा

मु: घा २९

मस्मिन्नेरोमहर्षणायप्रादात्॥तस्यचमुखादेतेत्रय्यारुण्यादयः॥एकैकांसंहितामधीयंत॥एतेषांषण्णांशिष्योहंताःसर्वाःसम
धीतवान्॥६॥रामशिष्योऽकृतव्रणः॥एवंचत्वारोवयंमूलसंहिताइत्यनेनततःसंहिताबाहुल्यंसूचितं॥७॥शुकपरीक्षित्संवा
देनिरूपितमपिपुराणलक्षणंतद्भेदकथनायदर्शयतिपुराणेति॥८॥अस्यविश्वस्य॥अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः

कश्यपोहंचसावर्णीरामशिष्योऽकृतव्रणः॥अधीमहिव्यासशिष्यात्चतस्रोमूलसंहिताः॥७॥पुराणलक्षणंब्रह्म
न्ब्रह्मर्षिभिर्निरूपितं॥शृणुष्वबुद्धिमाश्रित्यवेदशास्त्रानुसारतः॥८॥सर्गोस्याऽथविसर्गश्चवृत्तिरक्षांतराणिच॥
वंशोवंश्यानुचरितंसंस्थाहेतुरपाश्रयः॥९॥दशभिर्लक्षणैर्युक्तंपुराणंतद्विदोविदुः॥केचित्पंचविधंब्रह्मन्महदल्प
व्यवस्थया॥ ॥१०॥ ॥ ॥ ॥७॥ ॥७॥ ॥ ७॥

मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयइत्यत्रोक्तेस्थानपोषणेवृत्तिरक्षाशब्दाभ्यामुच्येते॥अंतराणिमन्वंतराणिवंशोवंश्या
नुचरितमितिइशानुकथाःसंस्थानिरोधः॥अनेनैवासंतिकलयरूपामुक्तिरप्युक्ता॥हेतुशब्देनजीवाश्रयवासनाशब्दवा
च्याऊतयोगृहीताः॥९॥दशभिरेतैर्लक्षणैरर्थैर्युक्तंमहापुराणंविदुःकेचित्पंचविधंसर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच॥
वंश्यानुचरितंचेतिपुराणंपंचलक्षणमितिमहत्पुराणंअल्पंचेतिव्यवस्थयायेत्रदशापिलक्षणानिपृथक्निरूपंतेतन्म

३०

हापुराणं॥यत्रत्वन्येषां पंचस्वेवांतर्भाविस्य विवक्षातदल्पमिति व्यवस्थेत्यर्थः॥१०॥छ॥छ॥छ॥सर्गादिलक्षणानि व्याचष्टे अव्याहृतेत्यादिना प्रधानस्य गुणानां क्षोभात्॥योमहान्तस्माद्यस्त्रिवृदहंकारस्तस्माद्भूतमात्राणां सूक्ष्माणां इंद्रियाणां चतदर्थानां स्थूलानां तत्तद्देवानां च संभवः॥सर्गः कारणसृष्टिः सर्ग इत्यर्थः॥उच्यत इतियथापेक्षमुत्तरत्राप्यनुषंगः॥११॥विसर्गं व्याचष्टे पुरुषेणेश्वरेणानुगृहीतानां एतेषां महदादीनां पूर्वकर्मवासनाप्रधानोऽयं समाहारः कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिवप्रवाहापन्नो विसर्ग उच्यत इत्यर्थः॥१२॥चराणां भूतानां सामान्यतोऽचराणि च काराच्चराणि च कामाद्वृत्तिः॥

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः॥भूतसूक्ष्मेंद्रियार्थानां संभवः सर्ग उच्यते॥११॥पुरुषानुगृहीतानामेतेषां वासनामयः॥विसर्गोयं समाहारो बीजाद्बीजं चराचरं॥१२॥वृत्तिर्भूतानि भूतानां चराणामचराणि च॥कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा॥१३॥रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे॥तिर्यङ्मर्त्यर्षि देवेषु हन्यंते यैस्त्रयीद्विषः॥१४॥ ॥ ॥छ॥छ॥ ॥छ॥छ॥ ॥छ॥

तत्र तु नृणां स्वेन स्वभावेन कामात् चोदनयाऽपि वा या नियता वृत्तिर्जीविका कृता सा वृत्तिरुच्यत इत्यर्थः॥तिर्यङ्मर्त्यर्षिदेवेषु चैस्युतावतारा: तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः यैरवतारैरितिसमासान्निष्कृष्यकर्थं चित्संबंधः त्रयीद्विषो दैत्याः॥
॥१४॥॥छ॥

३०

स

59

षड्विधंमन्वंतरमुच्यते ।। षड्विधमेवाह मनुरिति ।। मन्वादयः षडेते वर्गाः स्वस्वाधिकारेण यदा प्रवर्त्तंते तं मन्वंतरमित्यर्थः ।।१५।।
वंशमाह ब्रह्मणः सकाशात्प्रसूतिर्येषां राज्ञानामित्यर्थः ।। तेषामन्वयो वंशः तेषां वृत्तं ये च तद्वंशधरास्तेषां च वृत्तं वंश्यानुचरितमु
च्यते ।।१६।। अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य यद्वा मायातश्चतुर्विधो लयइति ।। ।।१७।। ।। ७ ।।

मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ।। ऋषयोऽंशावतारश्च हरेः षड्विधमुच्यते ।।१५।। राज्ञां ब्रह्मप्रसूतानां वंशस्त्रै
कालिकोऽन्वयः ।। वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ।।१६।। ।। नैमित्तिकः प्राकृतिको नित्य आत्यंतिको लयः ।। संस्थे
ति कविभिः प्रोक्तश्चतुर्धास्य स्वभावतः ।।१७।। हेतुर्जीवोस्य सर्गादेरविद्याकर्मकारकः ।। यं चानुशायिनं प्राहुरव्या
कृतमुतापरे ।।१८।। व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ।।१९।। ।।७।।

अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः सोऽच्यत इत्यर्थः ।। तस्य निमित्ततामाह ।। अविद्याकर्मकारकाः कर्मकर्त्ता जीवाद
ष्टप्रयुक्तत्वाद्विसर्गादेः स तु तत्र हेतुरित्यर्थः ।। ननु चानुशायी निमित्तमिति चेत् ।। अव्याकृतमित्यपरे तत्राह यमिति ।। चैतन्यप्राधा
न्येनानुशायिनं उपाधिप्राधान्यविवक्षया अव्याकृतं ।।१८।। अपाश्रयमाह ।। व्यतिरेकेति जाग्रदादिष्ववस्थासु जीववृत्तया वर्त्तं
त इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयान्वयः समाध्यादौ व्यतिरेकश्च यस्य तद्ब्रह्म संसारप्रती

तिबाधयोरधिनष्टानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥१९॥ तदेवसदृष्टांतं प्रपंचयति ॥ पदार्थेषु घयादिषु द्रव्यं मदादि यथा युतं अन्वितं अयुतं च बहिरप्यवस्थानात् रूपानामसु च सन्मात्रं सत्तामात्रं यथा ॥ एवं बीजं गर्भाधानमादिर्यासां पंचता अंते चयासां तासु देहावस्थासु नवस्वपि अधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च यत्तत् दपाश्रय इति ॥२०॥ एवं दशापि लक्षणानि व्याख्याय वर्णयंति महात्मान इति यदुक्तं तदाह विरमेति ॥ यदा सर्गादीनां मायामयत्वानुसंधानेन । वामदेवादेरिवस्वयमेव

२१

पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपंचतांतासु ह्यवस्थासु युतायुतं ॥२०॥ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं ॥ योगेन वा तदात्मानं वेदेहाया निवर्त्तते ॥२१॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोष्टादशप्राहुः क्षुल्लकानि महांति च ॥२२॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं ॥ नारदीयं भागवतमाग्नेयं स्कांदसंज्ञितं ॥ भविष्यं ब्रह्मवैवर्त्तं मार्कंडेयं सवामनं ॥ वाराहं मात्स्यं कौर्म्यं च ब्रह्मांडाख्यमिति त्रिषट् ॥२४॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्द्धनं ॥२५॥ ॥७॥ ७॥ ॥इति ० द्वादश० सप्तमोध्यायः ॥७॥ ॥७॥ ७ ॥ ७ ॥७॥

ता

चित्तं विरमेत् ॥ इहैवानुष्ठितेन योगेन वा । देवहूत्यादिवत् ॥ तदा विक्षेपाभावादात्मानं वेद तदा चाविद्या निवृत्तेरीहायाः संसाररूपायाः निवर्त्तत इत्यर्थः ॥२१॥ पुराणविभागं प्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रस्तुतमाह ॥ एवं विधैर्लक्षणैर्लक्ष्याणि

२१

त्रिषट् अष्टादश ॥२४॥ ॥~~द्वादशोऽध्यायः~~॥ उपसंहरतिब्रह्मन्निति मुने र्व्यासस्य शिष्यादीनां च ब्रह्मतेजो ब्रह्मवर्चसं तद्विव र्द्धनं श्रोतॄणामिति शेषः ॥२५॥ द्वादशोऽध्यायः ॥७॥७॥७॥७॥ अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहकैः ॥ कामादिभिरसंमोहो नरनारायणस्तुतिः ॥ पुराणविभागप्रसंगेन पुराणकर्त्तुर्मार्कंडेयस्य चरितं प्रस्तौनमाह ॥ सूतेति ॥ त्वमेव वक्तुं योग्य इत्याह ॥॥ तमसि संसारे भ्रमतां पारदर्शनिस्तन्निवर्त्तकः ॥१॥ प्रलयाभावादप्येतन्न घटत इत्याह ॥ सवा इति ॥ ॥यतो भार्गवर्षभः कोऽपि प्र

+ वक्तव्यमाह ॥ आहुरिति ॥ उर्वरितः अवशिष्टः येन कल्पांते न एतत्कथं घटते इसेवं प्रश्नः +

शौनक उवाच ॥ ॥ सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नॄणां त्वं पारदर्शनः ॥१॥ आहुश्चिरायु षमृषिं मृकंडुतनयं जनाः ॥ यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन्भा र्गवर्षभः ॥ नैवाधुनाऽपि भूतानां संप्लवः कोऽपि जायते ॥३॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल ॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतं ॥४॥ एष नः संशयो भूयान्सूत कौतूहलं यतः ॥ तं नश्छिंधि महायोगिन्पुराणेष्वपि सं मतः ॥५॥ ॥ ॥७॥७॥ ॥७॥ ॥ ७॥ ॥

हुतिकोनेमितिकोवा ॥३॥ ॥अन्यदप्यघटितमेवेत्याह एक एवेति ॥ तोकं बालकं ॥४॥ कौतूहलं औत्सुक्यं ॥ तं संशयं ॥ न केवलं त्वं महायोगी किंतु पुराणेष्वपि ज्ञातृत्वेन संमतः ॥५॥ ॥७॥७॥७॥७॥७॥

३२

प्रश्नमभिनिंदति ॥ हेमहर्षेऽयं प्रश्नः तत्र हेतुः नारायणेति ॥ यत्र प्रश्नविषये ॥ ६ ॥ तत्र मार्कंडेयस्तपसा भगवंतमाराध्य मायादर्शनं वव्रे ॥ ततश्चैतेन भगवन्मायया सप्तकल्पा दृष्टाः नान्येरिस्कंतरं वक्तुमादितआरभ्य तस्य चरितमाह ॥ प्राप्तेत्यादिना मार्कंडेयो महत्कं जिगय इति पंचश्लोकेनान्वयः मध्यमग्रंथेतस्य धर्माः कथ्यंते ॥ प्राप्तो द्विजातिसंस्कारः ॥ उपनयनाख्यो येनसः ॥ पितुः

सूत उवाच ॥ ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् ॥ छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः ॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन् संध्ययोर्हरिं ॥ ९ ॥ सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ ॥ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ७ ॥

सकाशात् गर्भाधानादिक्रमात् छंदांसि वेदान् ॥ ७ ॥ बृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये अग्न्यादिषु पंचसु हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुर्वर्थमाहृत्य तेन ज्ञातश्चेत्तर्हि बुभुजे नो चेत् सकृत्कदाचिदुपोषितो भवति ॥ १० ॥ ११ ॥ ३२

तेन नमस्कृजयेन ॥ १२ ॥ धरस्ताः क्लेशारागादयो यस्य तेन अंतरात्मना प्रसन्नाहृतेन मनसा ॥ १३ ॥ ॥ ७ ॥

तस्य तपो निष्ठामिति हासेन वर्णयति ।। एतदित्यादिना ।। अस्मिन् सप्तमे मन्वंतरे तपसा मत्पदं ग्रहिष्यतीति विशंकितः ।।१५।। मुन
ये मुनिं पतंत्रयितुं रजसस्तोकं अतिप्रियमपत्यं लोभः । मदश्चेतो ।।१६।।१७।। तदाश्रमपदं प्रविष्टौ वायुर्वा विति तत्तीयेनान्वयः ।। पु
ण्यैर्द्रुमैर्लताभिश्चाचिते पूजितं पुण्यद्विजानामृषीणां कुलैराकीर्णं पुण्या अत्यमला जलाशया यस्मिन् ।।१८।। मन्वंतरमराणां

एवं तपः स्वाध्याय परो वर्षाणामयुतायुतं ।। आराधयन् हृषीकेशं जिग्ये मत्स्ये सु[illegible]दुर्जयं ।।११।। ब्रह्मा[illegible]गुरुर्विदक्षो
ब्रह्मपुत्राश्चये परे ।। नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ।।१२।। इत्थं वृहद्व्रतधरस्तपः स्वाध्यायसंयमैः ।। दध्या
वधोक्षजं योगी ध्वस्तक्लेशांतरात्मना ।।१३।। तस्यैवं युंजतश्चित्तं महायोगेन योगिनः ।। व्यतीयाय महान्कालो मन्वं
तरषडात्मकः ।।१४।। एतत्पुरंदरो ज्ञात्वा सप्तमेस्मिन् किलांतरे ।। तपो विशंकितो ब्रह्मन्नारेभे तद्विघातनं ।।१५।।
गंधर्वाप्सरसः कामं वसंतमलयानिलौ ।। मुनये प्रेषयामास रजस्तोकमदौ तदा ।।१६।। ते वै तदाश्रमं जग्मुर्हिमा
द्रेः पार्श्व उत्तरे ।। पुष्पभद्रानदी यत्र चित्राख्या च शिला विभो ।।१७।। तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं ।। पु
ण्यद्विजाकुलाकीर्णं पुण्यामलजलाशयं ।।१८।। ।।७।।७।।७।। ७।।७ ।।

संगीतं यस्मिन् ॥ मत्तकोकिलानां कूजितं यस्मिन् मत्तबर्हिण एव नटास्तेषामाटोपः संभ्रमो यस्मिन् ॥ मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं ॥१९॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रससार उन्मेयन् उद्दीपयन् तत्र च क्लेषु प्रवेशमार्गं ॥ हिमनिर्झरकणानामादानात् शैत्यं पुष्पपरिष्टं मात्सौगंध्यं चोक्तं ॥२०॥ किंच ॥ उदयश्चंद्रो यस्मिन् तस्मिन् निशावक्त्रे रजनीमुखे यस्य सः ॥ प्रवालस्तबकानां मालयः श्रेणयो येषु तैः गुप्यं ति विटपैः संश्लिष्यंतीति गोपाद्रुमाः लताश्च

मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलं ॥१९॥ वायुः प्रविष्ट आदाय हिमनिर्झरसीकरान् ॥ सुमनोभिः परिषिक्तो ववावुन्नमयन् स्मरम् ॥२०॥ उदयश्चंद्रनिशावक्त्रः प्रवालस्तबकाभिभिः ॥ गोपद्रुमलताजालैस्तत्राऽसीत्कुसुमाकरः ॥२१॥ अन्वीयमानो गंधर्वैर्गीतवादित्रयूथिकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥२२॥ कृत्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमंतमिवानलं ॥२३॥ ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं ॥२४॥ ७ ॥ ७ ॥

तेषां जालैः समूहैः आविर्बभूव ॥२१॥ किंच तदा गीतवादित्रयूथिकैः गायकादिसमुदायिभिः गंधर्वैरन्वीयमानः ॥ तथा स्वःस्त्रियोऽप्सरसस्तासां यूथपतिः ॥ आत्तं चापमिषुश्च येन सं स्मरश्च तत्रादृश्यत ॥२२॥ दुराधर्षं अजितं भवितुं अशक्यं ॥२३-२४॥

शो षणादीपनसंमोहनतापनोन्मादनाख्यानि पंचमुखानि यस्य तदस्त्रं संदधे ॥ तदैव मधुर्वसंतः ॥ रजस्तोकश्च पुंस्त्वमार्षं
अन्ये चेंद्रप्रस्यास्तस्य मनो व्यकंपयन् ॥२५॥ द॥ किंच ॥ वायुर्मलयानिलः पुंजिकस्थल्याः तत्सूक्ष्मं वासो जहार ॥२७॥ सर्वं
तेषां कर्म तच्च तस्मिन्नमोघं व्यर्थं अनीशस्य निर्दैवस्य २८ ॥ मुनेरपकुर्वंतः प्रतिकूलमाचरंतः ॥ हे मुने ॥२९॥

संदधेऽस्त्रं स्वधनुषि कामः पंचमुखं तदा ॥ मधुर्मदो रजस्तोक इंद्रभृत्या व्यकंपयन् ॥२५॥ क्रीडंत्याः पुंजिकस्थ
ल्याः कंदुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥२६॥ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अ
नुकंदुकं ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं ॥२७॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभव
न्मोघमनीशस्य यथोद्यमः ॥२८॥ त इत्थमपकुर्वंतो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याऽहिमिवा
र्भकाः ॥२९॥ इतींद्रानुचरैर्ब्रह्मन्धर्षितोऽपि महामुनिः ॥ य[illegible]न्नागादह
मो भावं न तच्चित्रं महत्सु भो ॥३०॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् ॥ ब्रह्मर्षेर्विस्मयं समगात्स्मरं ॥३१॥ तस्यैवं युंजतश्चित्तं
तपः स्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥३२॥ ७ ७ ७

अहमः अहंकारस्य भावं विकारं ॥३०॥ निस्तेजसं म्लानवदनं ॥ स्वराडिंद्रः ॥३१॥ नरनारायणरूपो हरिः ॥३२॥ ७ ॥ ७
सकामं स्वगणं भगवान्स्वराट् ॥ श्रु २

३४

तावनुवर्षीय तिष्ठाभ्यां ॥ रौरवं हल्लाजिनं वल्कलं चांबरं ययोस्तौ ॥ पवित्रे पाणौ ययोस्तौ ॥ त्रिवृत् त्रिगुणं नवतं तुक मितिवा त्रिवृ
द्भिः पवमानमिसादौ नवतं त्वादिमयं ॥ ३३ ॥ वेदं च दर्भमुष्टिं किंवसा साक्षात्तपएवतौ ॥ तत्र हेतुः तपत्तडिद्वर्णं दीप्यमान विद्युत्सं
काशं यमिं शांगरो चिस्तेन रूपिणौ मूर्त्तिमंतौ ॥ तादृकूनेजोयुक्तमूर्त्तिभ्यां तपो मयत्वेन प्रकाशमानाविसर्थः ॥ प्रांशू उ
न्नतौ ॥ ३४ ॥ उच्चैर्महता आदरेण ॥ ३५ ॥ तयोः संदर्शनेन य आनंदस्तेन निर्वृत्ता उपशांता आत्मेंद्रियाशयाः देहेंद्रियमनो

तौ शुक्लं हस्तौ नवकं जलोचनौ चतुर्भुजौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवल्कमंडलुं दंडमृजुं
च वैणवं ॥ ३३ ॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू द
धानौ विबुधर्षभार्चितौ ॥ ३४ ॥ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्नेनामांगेन दंडवत्
॥ ३५ ॥ स तत्संदर्शनानंद निर्वृतात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥ ३६ ॥ उत्थायप्रां ज
जलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥ तयोरासनमादाय पादयो
रवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनआसीनौ प्रसादाभिमुखौ मुनिः ॥
पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ३९ ॥ ॥ मार्कंडेय उवाच ॥

3

३४

सियस्य सः न सेहे न शक्नोत् ॥ ३६ ॥ आश्लिषन् आलिंगयन्निव ॥ ३७ ॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण ॥ ३८ ॥
पादाभ्यां नम्य गरिष्ठौ पूज्यतमौ तौ प्रति ॥ ३९ ॥ ॥ ७ ॥ ७ ॥ ॥ ७ ॥

अंतर्यामिणस्तस्यैव प्रवर्त्तकत्वात् ॥ आत्मनस्त[illegible]तावस्वातंत्र्यं पश्यन्नाह किमिति हे विभो तव त्वां किं अहं वर्णये कथं स्तौमि ॥ यत् येन त्वयैव उदीरितः प्रेरितो ऽसुः प्राणः संस्पंदते प्रवर्त्तते ॥ तमसुमनु वागादयः स्पंदंति ॥ अत्र हेतुः ॥ वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्प्रसिद्धमित्यर्थः ॥ न केवलं प्राकृतानां तनुभृतां किंतु अजशर्वयोश्च अतः स्वस्य मम अपि तथैव च ॥ एवं यद्यपि न कचिदपि कस्यापि स्वांतंत्र्यं अथापि दारुयंत्रवत्तत्प्रवत्तिनैरपि वागादिभिर्भजतां पुंसां

किं वर्णये तव विभो यदुदीरितोऽसुः संस्पंदते तमनु वाङ्मन इंद्रियाणि ॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥४०॥ मूर्त्तीरिमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नाना बिभर्षि वितुमन्यतनुर्यथेदं सृष्ट्वा पुनर्ग्रसति सर्वमिवोर्णनाभिः ॥४१॥ ॥७॥ ७॥

भावबंधुरसि आत्मबंधुरसि ॥ न तु पित्रादिवद्देहमात्रबंधुः अहो कृपालुता तवेत्यर्थः ॥४०॥ ननु कथमावां प्राणादिप्रवर्त्तकौ धर्मपुत्रत्वादावयोरिति चेत्तत्राह ॥ मूर्त्तीरिति हे भगवन् भगवतस्तव इमे मूर्त्तीस्त्रिलोक्याः क्षेमाय पालनाय तापविरमाय दुःखनिवृत्त्यै ॥ मृत्युजित्यै मोक्षाय न तु त्वं कस्यापि पुत्र इत्यर्थः ॥ अत्र दृष्टांतः यथेदं विश्वं अवितुं अन्यास्तनूर्मत्स्यकूर्मादिलक्षणा ॥ नानानेकप्रकारा बिभर्षि तद्वत् ॥ न केवलं पालनादिमात्रं तव कर्म किंतु सृष्टिलयावपीत्याह ॥ सृष्ट्वेति ॥ तत्राप्यन्यनिरपेक्षत्वे दृष्टांतः ॥ ऊर्णनाभिरिवेति ॥४१॥ ॥७॥ ७॥

३५

यस्मादेवंभूत स्त्वं तस्मात्तवांघ्रिमूलं भजामीत्याह तस्येति ॥ तस्याविलुः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति तृतीयश्लो
केनास्यानुषंगः ॥ कथंभूतं मे घ्रिमूलं यत् स्थैयच्च स्थितं कर्मगुणकालानां रजोमलं अन्येच पूर्वोक्तास्तापादयो न स्पृशंति रूज
इति वा पाठः ॥ यतः वेदो हृदये येषां ते वेदहृतात्पर्यविदो मुनयः यदेव स्तुवंति ॥ नितरां नमंति यत् ॥ तस्मात्मये एवं स्तवनादि कुर्वं
ति ॥४२॥ यतः अन्यपुरुषार्थो नाऽस्तीत्याह ॥ नान्यमिति अंघ्र्युपनयात् श्रीमच्चरणप्राप्तेः अन्यः क्षेमं न विद्मः ॥ परितः सर्वेषु

तस्याविलुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशंति ॥ यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं
ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ॥४२॥ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥ ब्र
ह्माबिभेत्यऽलमतो द्विपरार्द्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ॥४३॥ तद्वै भजाम्यृतधियस्तव पाद
मूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ॥४४॥ छू

६

पिलोकेषु भीर्यस्य तस्य जनस्य तदेवाह ॥ द्विपरार्द्धं धिष्ण्यं स्थानं यस्य सः ब्रह्मापि ते कालस्व[illegible] विज्ञंभरूपात् कालादलं बिभेति
अतः किमु [illegible] वक्तव्यं ॥ तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥४३॥ यस्मादेवं तस्मात्तव पादमूलं भजामि ॥ कथंभू
तस्य [illegible]धियः सत्यज्ञानस्वरूपस्य यद्वा सत्या धीर्यस्य यस्मिन् वा तस्य आत्मगुरोर्जीवस्य नियंतुः अतः कारणात्परस्य किं

३५

हत्वा आत्मबुद्धिं द्यामावरकं अपार्थं च निष्फलं ॥ असच्छब्दतुच्छे अर्थे च नश्वरं इदं देहादिं भजने त्यक्त्वा असच्छे कथं प्रतीयते तत्राह ॥ आभिरिति मात्रैतदर्थयंतमसत्क्व किंलाभमात्रेन ततः पृथगस्तीत्यर्थः ॥ नन्वपवर्गायमेव तु मद्भजनं फलांतरार्थं त्वन्यभजनं कार्यमेव तत्राह तर्हीति ॥ यदि त्वां भजति पूरुषः तर्हि ते त्वत्त एव स चैवमनीषितमर्थं विंदेतेति ॥४४॥

सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोऽस्य ॥ लीलाधृता यदपि सत्त्वमयी प्रशांत्यै नाऽन्ये नृणां व्यसनमोहभियश्च याभ्यां ॥४५॥ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति ॥ यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतो भयमुतात्मसुखं च नान्यत् ॥४६॥ ॥७॥

ननु ब्रह्मरुद्रावपि ममैव मूर्ती अतो मामेव किमर्थं न माद्रियसे सत्त्वमिति ॥ यदपि यद्यपि तवैव मायाकृता एता लीलास्त्वयैव धृताः तथापि यास त्वमपी सैव च प्रशांत्यै मोक्षाय न केवलं अस्य प्रशांत्यै भावमात्र मन्यन्न जने किंच निषेधं नवेत्तदाहुर्व्यसनेति ॥४५॥ तदेव सदाचारेण दृढयति ॥ तस्मादिति ॥ हे भगवन्नत तव शुक्लां तनुं श्रीनारायणाख्यां अथ तावकानां च शुक्लां तनुं नराख्यां यद्यस्मात् सात्वताः सत्त्वमेव पुरुषाधीश्वरस्य रूपमुशंति मन्यंते न त्वन्यत् रजस्तमश्चेति ॥ अवशेषः यतः सत्त्वात् लोको वैकुंठाख्यः लोकत्वे सत्यपि अभयं चानोगे सत्यपि आत्मसुखं च ॥४६॥ ॥७॥

३६

अतस्त्वं प्रणमति ॥ तस्मै नम इति हंसाय शुद्धाय संयतगिरे नियतवाचे अथच निगमेश्वराय वेदमार्गप्रवर्त्तकाय ॥ ४७ ॥ वेदार्थसंप्रदायप्रवर्त्तने हेतुत्वं वदन् स्तौति ॥ यमिति ॥ कपटेंद्रियमार्गैर्भ्रमिद्धीः विक्षिप्तबुद्धिः पुमान् स्वस्वेषु स्वेंद्रियादिषु नियंतृत्वेन संतमपि यं त्वां न वेद ॥ दृक्पथेषु विषयेषु ॥ बुद्धिविक्षेपे हेतुः तन्मायया तस्य तवैव मायया आवृता आत्मनि ष्ठा मतिर्यस्य स उ सोपि आद्य एव पूर्वमज्ञातेव अखिलगुरोस्तव त्वत्सवर्त्तितवेदमुपासाद्य प्राप्य वं त्वां साक्षाद्वेद ॥ ४८ ॥

तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै ॥ नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्मायया वृतमतिः स उ एव साक्षादाद्यस्तेऽखिलगुरोरुपसाद्य वेदं ॥ ४८ ॥ यद्दर्शनं निगममात्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः ॥ तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधं ॥ ४९ ॥ इति० द्वा० अष्ट० ॥ ८ ॥

य वेदेनैव त्वत् ज्ञानमिरूपपादयन् ~~ज्ञानमित्यनमस्कारं~~ प्रणमति ॥ यस्य तव दर्शनं निगमे भवति ॥ कथंभूतं आत्मनस्तव रहस्यप्रकाशकं ॥ अन्यथा दुर्ज्ञेतामाह अजपराः ब्रह्ममुख्याः कवयोपि सांख्ययोगादिभिर्यतमानाः यत्र त्वयि मुह्यंति कुतइत्यत आह ॥ सर्वेषां सांख्यादिवादानां विषयाभेदस्तदयस्तेषां प्रतिरूपं तत्तदर्हं सारिं शीलं स्वभावो यस्य तं कुतः आत्मनादेहादिसंघातेन निगूढो बोधो यस्य तं तं एवंभूतं महापुरुषं त्वां वंदे ॥ ४९ ॥ अष्ट० द्वादशे अष्टमः ॥ ८ ॥ ८ ॥ ३६ छु

(७१)

नवमे भगवन्मायादिदृक्षोर्दर्शनं मुकुंदः ।। मायादिदृक्षोर्लुब्ध्याब्धौ च मुनेर्निर्वेदशानिर्गमैः ।। ४१ ।। भगवतः परितोषपूर्वकं तदपेक्षितवरदानं कथयितुमाह संस्कृतइत्यादि ।। १ ।। आत्मसमाधिना चित्तैकाग्र्येण ।। २ ।। वयं ते परितुष्टाः स्मेति बहुवचनेन सर्वदेवाभिप्रायेण ऽवरदेशादित्येकवचनेन द्वयोरैक्याभिप्रायेण प्रतीक्ष्व गृहाण ।। ३ ।। वरेणाक्षं दयताऽलया जितं उत्कर्षो दर्शितः ।। ममतु वराकांक्षा नास्तीत्याह वरेणेति ।। ४ ।। यत्तव श्रीमत्पादाब्जदर्शनं मनसापि गृहीला प्राप्य हृत

सूत उवाच ।। ।। संस्तुतो भगवानित्थं मार्कंडेयेन धीमता ।। नारायणो नरसखः प्रीत आह भृगूद्वहं ।। १ ।। श्रीभगवानुवाच ।। ।। भो भो ब्रह्मर्षिवर्योसि सिद्ध आत्मसमाधिना ।। मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः ।। २ ।। वयं ते परितुष्टास्म त्वद्बृहद्व्रतचर्यया ।। वरं प्रतीक्ष्व भद्रं ते वरदेशादभीप्सितं ।। ३ ।। ।। ऋषिरुवाच ।। जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ।। वरेणैतावताऽलं नो यद्भवान्समदृश्यत ।। ४ ।। गृहीत्वाजादयो यस्य श्रीमत्पादाब्जदर्शनं ।। मनसा योगपक्वेन स भवान्मेऽक्षगोचरः ।। ५ ।। अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ।। द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ।। ६ ।। ।। ७ ।। ७ ।। ७ ।। ।। ७ ।। ।। ७ ।।

थाः अजादयो भवंति स भवान्मेऽक्षगोचरो जातः किमतः परं वरेणेत्यर्थः ।। ५ ।। द्रक्ष्ये द्रष्टुमिच्छामि ।। लोकपालैर्ब्रह्मादिभिः सहितोयं लोकः जनः सद्भिदां सति वस्तुनि भिदां यये ति ।। ६ ।। ।। ७ ।।

२७

तथेति द्रक्ष्यसीति ईश्वरः स्मयन् प्रागात् ॥ पाठांतरे क्रियाविशेषणं ॥ ७ ॥ तमेवार्थं मायादर्शनरूपं अग्न्यादिमूर्तिषु ॥ ८ ॥
भावद्रव्यैर्मनोमयैर्द्रव्यैः क्वचित्कदाचित्प्रेमप्रसरसंप्लुतः प्रेमोद्रेकं प्राप्तः ॥ ९ ॥ मायादर्शनमाह ॥ तस्येत्यादिना ॥ १० ॥
तं वायुमनु बलाहका मेघा अभवन् ॥ आविर्बभूवुः ॥ ते च तडिद्भिः सहिता उच्चैः स्वनंतो गर्जंतः अक्षोरथांगं तद्दल ॥ स्थवि

सूत उवाच ॥ इतीडितोर्चितः कामम् ऋषिणा भगवान्मुने ॥ तथेति सस्मयन्प्रागाद्बदर्याश्रममीश्वरः ॥ ७ ॥ तमेव चिं
तयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥ ८ ॥ ध्यायन्सर्वत्र च हरिं भावद्रव्यैर
पूजयत् ॥ क्वचित्पूजां विसस्मार भक्तिप्रसरसंप्लुतः ॥ ९ ॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुने ॥ उपासीनस्य
संध्यायां ब्रह्मन्वायुरभून्महान् ॥ १० ॥ तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्कराला ॥ अक्षस्थवि
ष्ठा मुमुचुस्तडिद्भिः स्वनंत उच्चैरभिवर्षधाराः ॥ ११ ॥ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसंतः ॥
समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्त गभीरघोषाः ॥ १२ ॥ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपता
पितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥ १३ ॥ ॥ ७ ॥ श्री

२९

यं पाठांतरं ॥ ष्ठाः अतितो वर्षधारा मुमुचुः ॥ ११ ॥ त्वितु दृश्यंत वर्तमानाः समुद्राः समीरवेगेनोर्मयः तैः भूतिलं ग्रसंतं ॥ उग्रा नक्रा येषु
भयानका महाआवर्ता येषु गंभीरो घोषो येषु च तेते च ॥ १२ ॥ आत्मना सह जरायुजादि चतुर्विधं जगदंतर्बहिश्चोपतापि

तं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समग्र सत्त्वमयं प्र पैकैनोपतापितं अद्भिः कथंभूताभिः अतिद्युभिः अतिक्रांताद्यौर्याभिः रवेश्च सूर्यरश्मिभिः वायुभिर्वैतिशेषः ज्ञातहृदाभिश्च विद्युद्भिः दीर्घमार्षे छंदानुसारेण ॥१३॥ ७ प्रभंजनेनाघूर्णितं प्रकंपितं वाः उदकं यस्मिन् सः अप्य घात् छादयामास समं सह ॥१४॥ स द्वमांतरिक्षं भूम्यंतरि

तस्यैवमुद्दीक्षत उर्म्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वर्षद्भिरंबुदैः क्ष्मामप्यधात् द्वीपवर्षाद्रिभिः समं ॥१४॥ स क्ष्मांतरिक्षं स दिवं सभागणं त्रैलोक्यमासीत् सह साद्भिराप्लुतं ॥ स एक एवोर्वरितो महामुनिः र्बभ्रामविक्षिप्यजटाजडांधवत् ॥१५॥ क्षुत्तृट्परीतो मरेस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः ॥ तमस्यपारेपतितो भ्रमन्दिशो न वेद गां खं च परिश्रमेषितः ॥१६॥ क्वचिन्मतो महावर्त्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्षितः क्वापि स्वयमन्योन्यघातिभिः ॥१७॥ ॥७॥ ७॥

क्षस्थप्राणिसहितं स दिवं स्वर्गस्थदेवसहितं ॥ भागणाज्योतिर्गणाः तैः सहितं जटा विक्षिप्य विकीर्य ॥१५॥ परिश्रमेणाइषितः गतः व्याप्त इत्यर्थः ॥१६॥ अन्योन्यघातिभिः तद्भक्षणाय परस्परं युध्यद्भिः ॥१७॥ ७॥ ७॥ ७

३८ ना

॥१८॥ विष्णुमायावृतात्मन इति ॥ स तथा दृष्टवान् निरर्थः ॥१९॥ ककुदि उन्नतप्रदेशे न्यग्रोधपोतं कोमलं वटं ॥२०॥ तस्य । ईशानदिक् शाखायां शिशुमपि ॥२१॥ श्रीमत् रम्यं वदनपंकजं यस्य तं कंबुवत् त्रिरेखावृता ग्रीवा यस्य तं महोरस्कं । विशालवक्षसं ॥ सुनासं शोभना नासा यस्य तं ॥ सुंदरे भ्रुवौ यस्य तं ॥२२॥ श्वासे रेजंतः कंपमाना अलकास्तैः शोभातं शोभितं कंबुवत् अंतर्वलयेन श्रीर्ययोः ताः कंबुश्रियौ तयोः कर्णयोः दाडिमपुष्पे यस्य तं ॥ विद्रु

क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयं ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥१८॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन् विष्णुमायावृतात्मनः ॥१९॥ स कदाचिद् भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितं ॥ २० ॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं ॥ शयानं पर्णपुटके ग्रसंतं प्रभया तमः ॥ २१ ॥ महामरकतश्यामं श्रीमद्वदनपंकजं ॥ कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं ॥२२॥ श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमं ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितं ॥२३॥ पद्मगर्भारुणापांगं हृद्यहासावलोकनं ॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरं ॥२४॥ ॥

मतुल्याधरास्ता भासा ईषत् शोणायितं सुधातुल्यं स्मितं यस्य तं ॥२३॥ पद्मगर्भवत् आईषत् अरुणाव पांगौ नेत्रांतौ यस्य तं ॥ हृद्यो हासो यस्मिन् तत् अवलोकनं यस्य तं श्वासे रेजंतः चलं स्यो वलयस्ते ये क निम्ने रखाः तासिः सं

३८

७५

विग्राचंचलानि म्नागंभीराना मिर्यस्मिन् तं दलवदश्वत्थपत्रसंकाशमुदरं यस्य तं ॥२४॥ चारवः अंगुलयो ययोस्ताभ्यां
उन्नीय आहृत्य धयंतं पिबंतं ॥२५॥ हसद्भिश्च विलोचनांबुजे च प्रोत्फुल्लानि तानि यस्य सः ॥ अद्भुतभावं अत्याश्चर्य
रूपं तेन शंकितः सन्नपि तं प्रष्टुं पुरः प्रससार समीपं गतः ॥२६॥ अदः इदं जगत् यथापुरा प्रलयात् पूर्वं न्यस्तं विन्य
स्तं दृष्ट्वा च अतीव विस्मितः सन् विमुह्यन् ॥२७॥ ह्रत्तनशोदर्शनप्रपंचयति स्वमिस्यादिनाककुभो दिशः पुराणि

चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजं ॥ मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः ॥२५॥ तद्
दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रस
सार बालकं ॥२६॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोंतःशरीरं मशको यथाविशत् ॥ तत्राप्यदो न्यस्त
मचष्ट कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥२७॥ खं रोदसी भगणानद्रिसागरान् द्वीपान्सवर्षान्क
कुभः सुरासुरान् ॥ वनानि देशान्सरितः पुराकरान् खेटान्व्रजानाश्रमवर्णवृत्तयः ॥२८॥ महांति भूतान्य
थ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनं ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवाऽव
भासितं ॥२९॥ ॥७॥७॥७॥ ७ ॥ ७॥७ ॥७॥ ॥

आकराश्च खेटकान् कर्षकग्रामान् व्रजान् गोकुलानि ॥ आश्रमांश्च वर्णांश्च तेषां वृत्तीश्च ददर्श ॥२८॥ नानायुग

२९

निकल्पांश्च कल्पयंतितेन विकल्पत इतितथा तं कालं च स दिवपरमार्थ इवेक्षवन्नासितं ते तेनैव ॥२९॥ ॥ ॥०॥ वटं च तोकं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ॥३१॥ अथ तं बालकमधोक्षजं परिष्वक्तुम भ्ययादिति द्वयोरन्वयः ॥ कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ॥३२॥ ॥ ॥ ॥

हिमालयं पुष्पवहां च तां नदीं निजाश्रमं यत्र ऋषीनपश्यत् ॥ विश्वं विपश्यन्श्वसितात् शिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥३०॥ तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोपांगनिरीक्षणेन ॥३१॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥३२॥ तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः ॥ अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥३३॥ तमन्वथ वटो ब्रह्मन्सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥३४॥ ॥ ॥ इति श्रीभा० द्वादशस्कं० भगवन्मायादर्शनं नवमोऽध्यायः ॥९॥ ॥ ॥ ॥

तावत्स परिष्वंगलाभात्पूर्वमेव ऋषेस्तस्यांतर्हितो बभूव तदुद्यममेव कल्पे दृष्टांतः ॥ अनीशो निर्दैवः तेन निर्मिता इहा क्रीडा यथेति ॥३३॥ तं अंतर्हितं भगवंतमनु वटः सलिलं लोकसंप्लवश्च तिरोधायि अंतर्हितः स च स्वाश्रमे एव यथापूर्वं स्थित इति ३४ ॥ इति द्वादशे नवमः ॥९॥ ॥ ॥ ॥ ॥ ॥

२९

(78)

दशमे शिव आगत्य मुनेस्तुष्टो वरानदात् ॥ तेन साकं मतिप्रीया सभा भाष्य समाजयन् ॥ ज्ञानकाशया ज्ञानवस्तु काशमानया ॥ त्वज्ञजनं विनाविद्वांसोऽपियस्य तव मायया ज्ञानिनो वयमित्यत्य हे कोरणमुह्यंती त्यर्थः ॥ ॥ २ ॥ श्री नारायण एवस्वमाया दर्शनश्रांतं शिवरूपेण सांत्वयामास तदाह तमेव मित्यादिना निभृतात्मानं समाहित चित्तं रुद्राण्या भवान्या ॥ ३ ॥ निभृता निश्चला आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तं ॥ ४ ॥ निभृतं निश्चलमुदकं झषव्रात

सूत उवाच ॥ ॥ स एवमनुभूयेदं नारायण विनिर्मितं ॥ वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कंडेय उवाच ॥ ॥ प्रपन्नोस्म्यं ऽघ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्मायया पि विबुधा मुह्यंति ज्ञानकाशया ॥ २ ॥ सूत उवाच ॥ ॥ तमेवं निभृतात्मानं वृषेणदिविपर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ॥ ४ ॥ निभृतोदझषव्रातो वातापाये यथार्णवः ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥ श्री भगवानुवाच ॥ ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ ६ ॥ ॥ ७ ॥ ७ ॥

श्वयस्मिन्नू सः संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु ॥ यतो भवान्सिद्धिदः ॥ ५ ॥ आशिषः अभ्युदयलक्षणाः उत स्वित् अत्र हेतुः भक्तिमिति ॥ ६ ॥ ॥ ७ ॥ ७ ॥ ॥ ७ ॥

78

पूर्णकामत्वंव्यनक्ति॥येनत्वयाजगन्निर्वर्तंभवतीति॥१६॥निर्गुणत्वेनत्रिगुणत्वेनचनमस्करोति॥नमःशिवा निर्गुणाय
सत्वायसत्वाधिष्ठात्रेअतएवप्रमृडयतीतितथातस्मै॥१७॥नोस्मत्तःत्रयःब्रह्मविष्णुमहेश्वरं॥यत्वयेभ्यःते वयं॥१९॥
वरदानादिनाभवत्सेवैवास्वाभिःक्रियेतेनस्वनुग्रहःजगद्वंद्यत्वाद्भवतामिति॥ब्राह्मणान्स्तौति ब्राह्मणाइत्यादिना॥
येसाधवःसदाचाराःशांताःमत्सरादिरहिताःनिःसंगाःनिःकामाःनकेवलंतएवकिंच अहंचेत्यादिना॥२१॥

स्वागतासनपाद्यार्घ्य गंधस्रक्धूपदीपकैः॥आहत्वात्मानुभावेनपूर्णकामस्यतेविभोः॥१५॥करवामकिमी
शानयेनेदंनिर्वर्तंजगत्॥नमःशिवायशांतायसत्वायप्रमृडायच॥रजोजुषेथघोरायनमस्तुभ्यंतमोजुषे॥
॥१७॥ ॥सूतउवाच॥ ॥एवंस्तुतःसभगवान्आदिदेवःसतांगतिः॥परितुष्टःप्रसन्नात्माप्रहसंस्तमभा
षत॥१८॥ ॥श्रीभगवानुवाच॥वरंवृणीध्वनःकामंवरदेशावयंत्रयः॥अमोघंदर्शनंयेषांमर्त्योयद्विंदतेऽमृ
तं॥१९॥ब्राह्मणाःसाधवःशांतानिःसंगाभूतवत्सलाः॥एकांतभक्ताअस्मासुनिर्वैराःसमदर्शिनः॥२०॥
सलोकालोकपालास्तान्वंदंत्यर्चंत्युपासते॥अहंचभगवान्ब्रह्मास्वयंचहरिरीश्वरः॥२१॥७॥ ७॥

पूज्यतमत्वे [illegible]हेतवस्तेरमाहनेति अण्व पि अणुमात्रमपि चक्षते ॥ पश्यंतित स्मात्त्वएवं भूतान्युष्मान् ईमहि कं जेम ॥२२॥ ब्राह्मणेभ्यः ब्राह्मणान् आत्मसमाधानं चित्तैकाग्र्यं तप आलोचनं स्वाध्यायः अध्ययनं संयमः वागादिनियमः तैः ॥२४॥ किं च श्रवणादित्यादि ॥२५॥ चंद्रो ललामो भूषणं यस्य तस्य ॥ धर्मरक्षस्य युक्तं अमृतास्पदं वचः कर्णाभ्यां पिबन्ना तृप्यत् अलमिति वा म[illegible]न्यत । कर्णयोरमृतायनं इति वान्वयः ॥२६ शिवस्य वागेवामृतं तेन धस्तः क्लेशपुंजो यस्य सः ॥२७॥ इयं लीला दुर्विभाव्या अविचर्यायद्यया ईषितव्या

नेतमय्यऽच्युतेऽजे च निदामण्वपि चक्षते ॥ नात्मनश्च जनस्यापि तद्युष्मान्वयमीमहि ॥२२॥ नह्यंमयानि तीर्थानि न देवाश्चेतनोज्झिताः ॥ ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः ॥२३॥ ब्राह्मणेभ्यो नमस्यामो ये स्मद्रूपं त्रयीमयं ॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥२४॥ श्रवणादर्शनाद्वापि महापातकिनोऽपि वः ॥ शुध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः ॥२५॥ ॥सूत उवाच॥ ॥इति चंद्रललामस्य धर्मगुह्योपबृंहितं ॥ वचोमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् ॥२६॥ स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशं ॥ शिववागमृतध्वस्त [illegible]क्लेशपुंजस्तमब्रवीत् ॥२७॥ ॥ऋषिरु०॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणां ॥ यन्नमंती शितव्या नि [illegible]वंति जगदीश्वराः ॥२८॥ ७॥ ७॥ ७॥

निस्वतियम्या नियानि भूतानि जगदीश्वराः स्वयं नमंति स्तुवंति चेति ॥२८॥ ॥७॥७॥ ❀

अथवा लोकसंग्रहमात्रमेतदित्याह ॥ धर्ममिति ॥ प्रवक्तारोपि यत्स्वयं देहिनां धर्ममाचरंति ॥२९॥ नन्वेतत्स्वभावतिरस्कारः कथं मया क्रियते तत्राह ॥ नेति एतावलोकसंग्रहमात्रेण तैर्नमनादिभिः ॥ कथंभूतैः स्वमायामयी वृत्तिर्येषु तैः भगवतो मायिनस्तवानुभावो न दुष्येत । यतः प्रसिद्धस्य मायिनः कुहकं यथा कपटं यथा तथैतानि नमनादीनि अतस्तस्य यथा कुहकैः नात्मानुभावो दुष्यतद्वत्तितद्वत् ॥ न दुष्येतेति पाठे नकारस्य दृष्टांते ऽनुषंगः ॥३०॥ मायाचेष्टितं प्रपंचयन्स्तौति सृष्ट्वेति स्वप्न यति
स्वप्नदृक् यथैव स्वविद्याचेष्टितेद्द

धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनां ॥ आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च ॥२९॥ नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥३०॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृक् यथा ॥३१॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ॥३२॥ कं वृणे नु परं भूमन्वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ॥३३॥ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥३४॥ ॥सूत उ०॥ इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवान्शर्वः शर्वया चाभिनंदितः ॥३५॥ ॥छ॥छ॥छ॥

ष्टांतः ॥३१॥ त्रिगुणत्वेपि न जीववत्तद्भिभूताय किंतु गुणानामात्मने नियंत्रे ॥३२॥ कं वृणीयेति यदुक्तं तत्राह कमिति । वरं दर्शनं यस्य तस्मात्त्वत्तः ॥छ॥छ॥

४२

परं वैनुचरं वृणो यस्य तव दर्शनात्पूर्णकामः सर्वानंद संदोह रूपः सत्य कामः यथेष्टं प्राप्त सर्वानंदः ॥ ३७ ॥ वरदानौ स्वय
मेव प्रवृत्तः शर्वयाउमयाचाभिनंदितः सन्नाह ॥ ३५ ॥ ॥ ७ ॥ ७ ॥ कामोयं सर्वोपि अव्यच्चपुण्यं यशद्रस्यादि ॥ ३६ ॥ ब्रह्मव
र्चस्विनस्ते भूयादित्यन्तरेणान्वयः ॥ यस्त्वमधोक्षजे भक्तिमान् ॥ ३७ ॥ तस्य कर्मतप आदि ॥ मुनेः पुरानुभूतं च भगवन्मायाचेम
वेतऽच्चकथयन् ॥ ३८ ॥ अवाप्तो महायोगमहिमायेन सः ॥ ३९ ॥ एतन्मार्कंडेयस्य चरितं तेनानुभूतं च भगवन्मायावैभवं ते
नुवर्णितं ॥ ४० ॥ नन्वेवमद्यस्म कुलोसन्नस्य सप्तकल्पायुष्टं वदे रुच्यमानं विरुद्धमेव तत्राह ॥

कामस्तेऽयं महर्षेस्तु भक्तिमां स्त्वमधोक्षजे ॥ आकल्पांताद्यशः पुण्यमजरामरतातथा ॥ ३६ ॥ ज्ञानं त्रैकालिकं ब्रह्मन्
विज्ञानं च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात् पुराणाचार्यताऽस्तुते ॥ ३७ ॥ ॥ सूत उ० ॥ एवं वरान् समुनये दत्त्वागात्
त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन् अनुभूतं पुरामुने ॥ ३८ ॥ सोप्यवाप्त महायोगमहिमा भार्गवोत्तमः ॥ विचरत्यधुना
प्यद्धा हरावेकांततां गतः ॥ ३९ ॥ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतं ॥ ४० ॥
एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ॥ अनाद्यावर्तितं नॄणां कादाचित्कं प्रचक्षते ॥ ४१ ॥ य एवमेतद्भृगुवर्यवर्णितं
रथांगपाणे रनुभावभावितं ॥ संश्रावये त्संशृणुयादुतावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४२ ॥ इति श्री० द्वा० दशमः ॥

एतन्मार्कंडेयेनानुभूतं भगवन्माया वैभवं

४२

(८२)

वं नानाकल्परूपं कादाचित्कं ईश्वरेच्छया तस्यैवाकस्मिकं ननु सर्वसाधारणं एतत् केचित् । अनादिच बहुकालं आवर्त्तितं देवयुगसहस्रद्वयमानेन पुनः पुनः परिवर्त्तितं प्रचक्षते ॥ केतेन्द्रपाः संस्रतिं सर्गप्रलयादिलक्षणां आत्मनो भगवतो मायैवेवमविद्वांसः विद्वांसस्तु मायाश्रितोः भ्रान्तो वासाभ्यां सम्पत्क्लेशस्तु उदरप्रवेश निर्गमतः समस्तकल्पत्वं तत्क्षणमात्रेणेति वदंति ॥ अतो न विरोध इत्यर्थः ॥ ४१ ॥ संश्रु पुयात्कउत्तसंश्रावयेद्वायोतावुभौ तयोः कर्मवासना कृतासंस्रतिर्न भवेदिति ॥ ४२ ॥ ॥ इति ० द्वा ० दशमः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

शौनक उवाच ॥ ॥ अथेममर्थं पृछामो भवंतं बहुवित्तमं ॥ समस्ततंत्रराद्धांते भगवान् भागवततत्त्ववित् ॥ १ ॥
तांत्रिकाः परिचर्यायां केवलस्य श्रियःपतेः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथेवयैः ॥ २ ॥ तन्नो वर्णय भद्रं ते
क्रियायोगं बुभुत्सतां ॥ येन क्रियानैपुण्येन मर्त्यो यायादमर्त्यतां ॥ ३ ॥ ७ ॥ ७ ॥

मास

एकादशे तु पूजार्थं महापुरुषवर्णनं ॥ रवेर्व्यूहस्य चाख्यानं प्रतिवर्षं पृथक् पृथक् ॥ १ ॥ ११ ॥ येनामर्त्यत्वमापन्नो मर्त्यो मार्गेतोत्तमः ॥ तं पृछति क्रियायोगं सांगोपांगादिकल्पितं ॥ २ ॥ अथेति हे भागवत यतो भवान् समस्ततंत्रराद्धांते तत्त्ववित् ॥ १ ॥ प्रष्टव्यमाह ॥ ॥ तांत्रिका इति ॥ परिचर्यायां उपासनायां विषये केवलस्य चैतन्यघनस्य ॥ अंगानि पादादीनि ॥ उपांगानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयः तेषां देदेक्यंत यथाकल्पयंति येश्च तैः क

रूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह ॥ नमस्कृत्वेति ॥ विभूतीः विराड्विग्र
ल्पयंति रत्नं नो वर्णयेति गुरूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह ॥ यथा कल्पयंतीति प्रश्नस्य वैराजे रूपेण स्कन्नं वक्तुं विराड्विग्र
हा याः ५ अंगादिकल्पना भूरादिभिर्देशयितुं प्रथमं तावद्यथा कल्पयंतीति प्रश्नस्य वैराजे रूपेण स्कन्नं वक्तुं विराड्विग्र
ह माह ॥ मायाख्यैः प्रकृति सूत्र महदहंकार पंचतन्मात्रैर्नवभिस्तत्त्वैः विकार एकादशेंद्रियाणि पंचमहाभूतानीति षोडश

याः प्रोक्ता वेदगर्भाय आचार्यैः पद्मजादिभिः ॥ ५ ॥ मा
सूत उवाच ॥ नमस्कृत्वा गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदगर्भाय आचार्यैः पद्मजादिभिः ॥ ५ ॥ मा
याद्यैर्नवभिस्तत्त्वैः सविकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ॥ ५ ॥ एतद्वै पौरुषं रूपं भूःपा
दौ द्यौः शिरो नभः ॥ नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥ प्रजापतिः प्रजननमपानो मृत्युरीशि
तुः ॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोऽधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरु
हा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥ ८ ॥

तन्मयो विराट् सप्रसिद्धो निर्मितं यत्र विराजि सच्चित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते ॥ अनेनांगादिकल्पना सौ
लभ्यं दर्शितं ॥ ५ ॥ एतद्वै पौरुषं रूपं ॥ ॥ पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तस्य रूपमु
च्यते अंगकल्पनामाह ॥ ॥ भूः पादावित्यादि त्रिभिः भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ ६ ॥ प्रजननं मेढ्रं ॥ अ
पानः पायुः ॥ ७ ॥

अनुक्तमन्यदप्येवमूह्यमित्याह ।। यावानयं व्यष्टिपुरुषः समानतः सप्तवितस्ति संख्यया वयवसन्निवेशेन मितः ।। ।।९।। भूषणादीन्याह ।। कौस्तुभेत्यादिना ।। स्वात्मज्योतिः शुद्धजीवचैतन्यं । या तस्य कौस्तुभस्य प्रभा तां ~~...~~ मे वक्षी वत्सं विभर्त्ति ।।१०।। त्रिवृत्स्वरं त्रिमात्रं प्रणवं ।।११।। पारमेष्ठ्यं पदं ब्रह्मलोकं ।।१२।। अव्याकृतं प्रधानं ।। यत्र अधिष्ठितः अधिष्ठाय स्थितः ।। यदासनं भूतं पद्मं सत्वं सत्वगुणः ।।१३।। मुख्यतत्वं प्राणं

यावानयं वै पुरुषो यावत्या संस्थया मितः ।। तावानसावपि महापुरुषो लोकसंस्थया ।।९।। कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ।। तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः ।।१०।। स्वमायां वनमालाख्यां नानागुणमयीं दधत् ।। वासश्छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ।।११।। बिभर्त्ति सांख्यं योगं च देवो मकरकुंडले ।। मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं ।।१२।। अव्याकृतमनंताख्यमासनं यदधिष्ठितः ।। धर्मज्ञानादिभिर्युक्तं सत्वं पद्ममिहोच्यते ।।१३।। ओजः सहोबलयुतं मुख्यतत्वं गदां दधत् ।। अपां तत्वं दरवरं तेजस्तत्वं सुदर्शनं ।।१४।। नभोनिभं नभस्तत्वमसिं चर्म तमोमयं ।। कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं ।।१५।।

त्वं

तत्वं प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं ।।१४।। आकूतीः क्रियाशक्तियुक्तं मनः ।। अस्य रथस्याभिव्यक्तिरूपं ।।

४४
४२

नयपद्मा

मुद्रया धृतया अर्घ्यक्रिया त्मतां वरदानौ पद्मा दिरूपत्वं बिभर्तिः॥ तत्तन्मुद्रया तथा॥ तथा भवयेदित्यर्थः॥१६॥ मंडलं देवयजनं देवपूजा भूमिं सूर्यमंडलत्वेन भाव येदित्यर्थः॥१७॥ पूर्वमासनपद्ममुक्तं अंतर्वह्निमंडलं वा दीक्षासंस्कार आत्मनः॥ गुरुकृतां मंत्रदीक्षामेव आत्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः॥ परिचर्येति॥ भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयाय एवं रूपं भावयेदित्यर्थः॥१८॥ पूर्वमासनपद्ममुक्तं॥ इदानीं मंतस्थ [कारका] पद्ममाह॥ भगवंनिति भगवत्

त्री

इंद्रियाणि द्वाराणि अकुराकूतीरस्य स्यंदनं॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रया अर्घ्यक्रियात्मनां॥१६॥ मंडलं देवयजनं दीक्षा संस्कार आत्मनः॥ परिचर्या भगवत आत्मनो दुरितक्षयः॥१७॥ भगवान् भगशब्दार्थं लीलाकमलमुद्वहन्॥ धर्मं यशश्च भगवान् चामरव्यजने भजत्॥१८॥ आतपत्रं तु वैकुंठं द्विजाधामाकुतोभयं॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं॥१९॥ ॥७॥७॥७॥७॥७॥७॥

स्कार

४५
४२

ब्दार्थं ऐश्वर्यादिषाड्गुण्यं॥१८॥ हे द्विजाः एकवचनांतो वा पाठः अकुतोभयं कैवल्यं धाम गृहं सम मम जानीयद्वा वैकुंठस्य विशेषणं अकुतोभयं यद्धामेति॥ त्रिवृत् ऋग्यजुःसामरूपो वेदः सुपर्णोसि गरुत्मान् त्रिवृत्ते शिर इत्यादिमंत्रलिंगात् यज्ञं यज्ञरूपं पुरुषं यज्ञो वै विष्णुरिति श्रुतेः॥१९॥

(८६)

अनपायिनी हरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः ॥ तं च मूर्त्तिः पंचरात्राद्यागमरूपः २० ॥ ये णिमादयोऽष्टौ गुणाः ते हरेर्द्वारपाला नंदादयः ॥ तस्यैव च चतुर्व्यूहोपासनमाह ॥ वासुदेवादि शब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्त्तिभेदैः रूपास्य इत्यभिधीयते ॥ २१ ॥ तस्यैवाध्यात्मनि चतुर्धोपासनमाह ॥ स एव भगवान्विश्वो शब्दैः

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तत्र मूर्त्तिर्विदितः पार्षदाधिपः ॥ २० ॥ नंदादयोऽष्टौ द्वास्थाश्चैतेऽणिमाद्या हरेर्गुणाः ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं ॥ अनिरुद्ध इति ब्रह्मन्मूर्त्तिव्यूहोऽभिधीयते ॥ २१ ॥ स विश्वस्तैजसः प्राज्ञः स्तुरीय इति वृत्तिभिः ॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥ २२ ॥ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं ॥ बिभर्त्ति स्म चतुर्मूर्त्तिर्भगवान्हरिरीश्वरः ॥ २३ ॥

वृत्तिभिः ॥ जाग्रदाद्यवस्थाभिः परिभाव्यते ॥ तद्रूपाधीनाह ॥ अर्था बाह्याः इंद्रियं मनः आशयस्तदुभयसंस्कारयुक्तमज्ञानं ज्ञानं चित व्यसाक्षित्वेः ॥ २३ ॥ उक्त चतुर्व्यूह द्वयोपासने ऽपि पूर्वोक्तमंगाद्युपासनमाह । अंगेति ॥ अंगादिभिरूपलक्षितो भगवान् — — — — — — — — — — — — — —

४५

हरिर्वासुदेवादिचतुर्मूर्तिः सन् विश्वादिचतुष्टयं बिभर्त्ति स्म ॥ विश्वादिभावेऽपि तन्नियंतृत्वात्तस्य न जीवत्वमित्याह
विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥ २३ ॥ छ ॥ तस्य ब्रह्मादि त्रिमूर्त्तितामाह द्विजऋषभेति ॥
स एष एव भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादि हेतुत्रयं ॥ वस्तुतो भेदाभावेऽपि च स्वगतमायया सृजति
हरति पातीति छ त्वाआख्यया ब्रह्मादि रूपया अनावृताक्षः ॥ भा ॥ छ ॥ ज्ञा

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्यया
नावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंश
दहनाऽनपवर्गवीर्य गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥ २५ ॥
य इदं कल्य उत्थाय महापुरुषलक्षणं ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं ॥ २६ ॥
सख

नोऽपि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः ॥ अत्र विद्वदनुभवं प्रमाणयति ॥ यतस्तत्परैरात्मनैव लभ्यत इति ॥ २४ ॥ यस्येदमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते ॥ कृष्ण अर्जुनस्य सखे वृष्णिश्रेष्ठ अवनिद्रुहो ये राजन्याः तेषां वंशस्य दहन अनपवर्गं अक्षीणं वीर्यं यस्य ॥ गोपवनितानां व्रजाः समूहाः भृत्या नारदादयः ॥ तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फलमित्याह य इति ॥ कल्ये

उषःकाले यस्तच्चित्तः प्रयतः शुचिः सः

४५

द्वै ३

जस्वागुह्यायां हृदिस्थे ब्रह्म पश्यति ॥२६॥ ॥ मंडलं देवयजनं मिस्यं त्वा बुद्धिमागतः मूर्त्तिव्यूह प्रसंगे नर
विव्यूहोऽच प्र च्यते ॥१॥ ॥ रुरुक इति ॥ ॥ पंचमेयदाहृतथाऽन्येच ॥ ऋषयो गंधर्वा अप्सरसो नागा ग्राम
ण्यो यातुधाना देवा इत्येके शोगणाः सप्त सादिना ॥ सौरः सूर्यसंबंधी सप्तानां गणः ॥ २७॥ तेषां सप्तानां अधीश्च
रैः तत्त सतितिः ॥ तत्तन्मासादिप्रविहृत सूर्यै वा व्यूह विभाग ॥ २८॥ तत्र तावत् व्यूहं निरूपयितुं प्रथमं सूर्यस्व

शौनक उवाच ॥ शुको यदाहभगवान् विष्णुः रातायशृण्वते ॥ सौरो गणो मासि मासि नाना वसति सप्तकः
तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ॥ बृहिनः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥ २८ ॥ सूत उ०
अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां ॥ निर्मितो लोकतंत्रोयं लोकेषु परिवर्त्तते ॥ २९॥ एक एव हि लो
कानां सूर्य आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलं ऋषिभिर्बहुधोदितः ॥ ॐ कालो देशः क्रिया कर्त्ता क
रणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन् नवधोक्तोजयाहरिः ॥ ३१॥ ॥

रूपमाह ॥ अनाद्यविद्यया मायया अयं सूर्यः लोकतंत्रः लोकत्रयप्रवर्त्तकः ॥ २९ ॥ अतस्तस्य क्रियाभेदोपाधिक
मेव नानात्वं न स्वत इत्याह ॥ एक एवेति ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेर्जगदात्मा ॥ आदिकृत् सृष्टिकर्त्ता ह
रिरेव सूर्यः स च स धीसां वेदोक्तक्रियाणां मूलं स न् नेनोपाधिना बहुधोक्तः ॥ ३०॥ कालरूपधारिणो हरे र्द्वादशा
दित्यरूपभेद क्रियोपाधिकं दर्श

४४

४६

यितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा वेद माहकाल इति ॥ कालः प्रातरादि देशः समासि क्रिया अनुष्ठानं कर्त्ता ब्राह्मणादि करणं स्नुगादिका र्येयागादि आगमः ॥ मंत्रादि ॥ द्रव्यं ब्रीह्यादि फलं स्वर्गादि ॥ ३१ ॥ ७ ॥ ७ ॥ ७ ॥ तत्र च कालरूपधारी भगवान् पृथक् चरति मध्वादिषु चैत्रादिषु लोकतंत्राय लोकयात्रा निर्वाहाय ॥ ३२ ॥ नानेव गणा नाह धातेति ॥ द्वादशभिः धाता सूर्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिर्नागः रथकृत् यक्षः पुलस्त्य ऋषिः तुंबुरु गंधर्वः ॥ ३३ ॥ अथोजा यक्षः प्रहेती राक्षसः ॥ नारदो गंधर्वः कछनीरो नागः ॥ माधवं वैशाखं ॥ ३४ ॥ ७

मध्वादिषु द्वादशसु भगवान् कालरूपधृक् ॥ लोकतंत्राय चरति पृथक् द्वादशभिर्गणैः ॥ ३२ ॥ धातेभितु धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ॥ ३२ ॥ अर्यमा पुलहो थौजाः प्रहेतिः पुंजकस्थली ॥ नारदः कछनीरश्च नयंत्येते स्म माधवं ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहा ॥ रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी ॥ ३८ ॥ ॥

४६

मित्रः सूर्यः पौरुषेयो राक्षसः रथस्वनो यक्षः शुक्रमासं ज्येष्ठं नयंत्यनुवर्त्तयंति ॥ ३५ ॥ वरुणः सूर्यः सहजन्यो यक्षः शुक्रो नागः ॥ चित्रस्वनो राक्षसः ॥ शुचिमासं आषाढं ॥ ३६ ॥ इंद्रः सूर्यः विश्वा

वसुर्गंधर्वः श्रोतायक्षः एलापत्रोनागः वर्यो राक्षसः इति स्वयमेव व्याख्यातं नमो मासं श्रावणं ॥ ३७ ॥ विवस्वान् सूर्यः ॥
उग्रसेनो गंधर्वः व्याघ्रो राक्षसः आसारणो यक्षः शंखपालो नागः नभस्याख्यं भाद्रपदं ॥ ३८ ॥ ०॥ ०॥ ❀ धनंजयो नागः
वातो राक्षसः ॥ सुषेणो गंधर्वः सुरुचिर्यक्षः ॥ तपोमासं माघं ॥ ॥ मासक्रमात्तिलं घनं ॥ कौर्मक्रोदिक्रमानुसारेण ॥ वे
देऽत्र तु मासक्रमेणैवोक्तिः क्वचिन्नामव्यत्ययस्तु कल्पभेदेनेति ज्ञेयं ॥ ३९ ॥ ऋतुर्यक्षः वर्चाः राक्षसः पर्जन्यः
सूर्यः सेनजित् अप्सराः विश्वो गंधर्वः ऐरावतो नागः ॥ तपस्याख्यं फाल्गुनं ॥ ४० ॥ ०॥ ०॥ ०॥ ०॥ ०॥ ❀

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा ॥ घृताची गौतमश्चेति तपोमासं नयंत्यमी ॥ ३९ ॥ ऋतुर्वर्चा भर
द्वाजः पर्जन्यः सेनजित्तथा ॥ विश्वैरावतश्चैव तपस्याख्यं नयंत्यमी ॥ ४० ॥ अथांशुः कश्यपस्तार्क्ष्यः ऋतसे
नस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी ॥ ४१ ॥ भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्च पंचमः ॥
कर्कोटकः पूर्वचित्तिः पुष्यमासं नयंत्यमी ॥ ४२ ॥ त्वष्टा ऋचीकतनयः कंबलाश्वस्तिलोत्तमा ॥ ब्रह्मापेतोऽथ
शतजिद्धृतराष्ट्र इषंभराः ॥ ४३ ॥ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमा
॥ सं नयंत्यमी ॥ ४४ ॥

अंशुः सूर्यः अंशइति वा पाठः तार्क्ष्यो यक्षः ऋतसेनो गंधर्वः ॥ विद्युच्छत्रुः राक्षसः ॥ महाशंखो नागः सहोमासं मार्ग
शीर्षं ॥ ४१ ॥ भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गंधर्वः ॥ ऊर्णो यक्षः ॥ आयुर्ऋषिः ॥ कर्कोटको नागः ॥ ४२ ॥ ऋचीक
तनयो जमदग्निः ॥ कंबलाश्वो नागः ब्रह्मापेतो राक्षसः ॥ शतजिद्यक्षः ॥ धृतराष्ट्रो गंधर्वः इषंभराः आश्विनपालकाः ॥
विष्णुरादित्यः अश्वतरो नागः सूर्यवर्चा गंधर्वः सत्यजित् ॥ यक्षः ॥ मखमखा ॥ ४३ ॥

एतेषां पृथक् कर्माणि निरूपयति ॥ द्वादशस्वपीति त्रिभिः ॥ असौ देवः सूर्यः षड्भिर्गणैर्घ्वोदिभिः अस्य जनस्य समंतात्चरन्नुरुमतिं तनुते ॥ गायत्र्यर्थो ऽनेन सूचितः ॥ ४६ ॥ तल्लिंगैः सूर्यप्रकाशकैः ४७ उन्नह्यंति दृढं बध्नंति ग्रामण्यो यक्षाः ॥ नैर्ऋताः राक्षसाः ४८ किंच वालखिल्या इति । एते प्रतिमासं तत एव विभुं सूर्यं ॥ ४९ ॥ व्यूह्य विभज्य ॥ ५० ॥ ॥ इति० द्वा० एकादशः ॥ ॥ द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः ॥ प्रथमस्कंधमारभ्य प्राधान्येन समासतः ॥ तदेवमस्मिन् पुराणोक्तानर्थान् संक्षेपतो वर्णयिष्यन् धर्मादी — — — — — — — —

द्वादशस्वपि मासेषु देवो ऽसौ षड्भिरस्य वै ॥ चरन् समंतात्तनुते परत्रेह च सन्मतिं ॥ ४६ ॥ सामर्ग्यजुर्भिस्तल्लिंगैरृषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसो ऽग्रतः ॥ ४७ ॥ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः ॥ चोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ॥ ४८ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयो ऽमलाः ॥ पुरतो ऽभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः ॥ कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥ ५० ॥ ॥ इति श्री० एकादशः ॥ छ ॥ छ ॥ सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १ ॥ एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं ॥ २ ॥ ॥

न

न्प्रणमति ॥ नम इति महते हरिभक्तिलक्षणाय ब्राह्मणेभ्यः । ब्राह्मणान् सनातनान् धर्मान् निरूपलक्षणं पुराणोक्तार्थान् २ पुरुषत्वे उचितं श्रवणादियोग्यं ॥ २ ॥ ॥

९२

४८

एतत्प्रपंचयन्ति अत्रेति। भगवान् ऐश्वर्यादिषड्गुणः साक्षात्संकीर्त्यते इति देवताकांडार्थः ॥३॥ ब्रह्मकांडार्थमाह अत्र ब्रह्मेति ॥ गुह्यं निर्गुणं प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवं ॥ अप्येत्यस्मिन्निति अप्ययं तच्च तच्च अनेनाश्रयशब्दार्थो दर्शितः ॥ विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतं ज्ञानं ॥ तदुपाख्यानं तत्त्वज्ञानमुपाख्यायते प्रकाश्यते येन तत्तत्त्वज्ञानसाधनमित्यर्थः ॥४॥ कर्मकांडार्थमाह भक्तियोगश्च साध्यसाधनरूपः ॥ तदाश्रयं भक्तियोगेन निष्पादितं ॥५॥ एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थाननुक्रमति ॥पा

नि

अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्वतांपतिः ॥३॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ॥४॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं ॥५॥ पारीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥६॥ शुकस्य च ब्रह्मर्षेः संवादश्च परीक्षितः ॥ योगधारणयोत्क्रांतिः संवादो नारदाजयोः ॥७॥ अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥८॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥ ततः प्राकृतिकः सर्गो सप्त वैकृतिकाश्च ये ॥९॥ ॥

रीक्षितमुपाख्यानं परीक्षितजन्मादि तत्प्रस्तावाय नारदाख्यानं च ॥६॥ ब्रह्मर्षेर्ब्राह्मणोत्तमस्येति ॥ प्रथमस्कंधार्थः ॥७॥ उत्क्रांतिरर्चिरादिगतिः ॥७॥ प्रधानिकप्रधानकार्यविर्द्रूपः अग्रतः आदितः महदा

रा

४८

दिक्क्रमेणेत्यर्थः॥ इति द्वितीयार्थः॥ महापुरुषस्य संस्थितिः॥ प्रलये तूष्णीमवस्थानं प्राकृतिकः प्रकृति
भवो गुणक्षोभरूपः वैकृतिकामहदादयः॥ चकारादि विकारश्चये॥ तयोस्तेषांच सर्गाः॥९॥७॥८॥ कै
गतिः स्वरूपं॥१०॥ उद्धारणं उद्धरणं॥११॥ अर्द्धाभ्यां नारीच नरश्च तस्य॥१२॥ संतानो धर्मपत्नीनामि
ति नवब्रह्मसमुत्पत्तिरित्यस्यानंतरं द्रष्टव्यं॥१३॥ चतुर्थस्कंधार्थमाह नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः
संतानः॥१४॥ पंचमस्कंधार्थमाह ततः प्रैयव्रतं प्रियव्रतस्य चरित्रं॥१५॥ द्वीपाद्युपवर्णनं प्रथ ----

ततो ब्रह्माण्डसंभूति वैराजः पुरुषो यतः॥ कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः॥१०॥ भुव उद्धार
णे भोधौ हिरण्याक्षवधो यथा॥ उर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च॥११॥ अर्द्धनारीनरस्याथ यतः स्वा
यंभुवो मनुः॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा॥१२॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः॥ अवतारो
हि देवस्य कपिलस्य महात्मनः॥ देवहूत्याश्च संवादः कपिलेन कपिले न च धीमता॥ नवब्रह्मसमुत्पत्तिर्दक्ष
यज्ञविनाशनं॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः॥१४॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजा॥ ना
भेस्ततोनुचरितं ऋषभस्य भरतस्य च॥१५॥ ततो द्वीपसमुद्रादि वर्षवर्षोद्युपवर्णनं॥ ज्योतिश्चक्रस्य संस्थानं
पातालनरकस्थितिः॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥

मं संक्षेपतः॥ ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनं पातालनरकादीनां च स्थितिः॥ अनेने व नर

४९

कनिवर्त्तकमजामिलोपाख्यानं गृहीतं ॥१६॥ ततः प्राचीनेष ऽष्टार्थमाह ॥ दक्षजन्मेति ॥१७॥ सप्तमार्थमाह पुत्रयोश्चेति ॥१८॥ मन्वंतरानुचरितमिति केचित्कस्यचिदनुक्तिः स्युः अमोक्तिश्च भक्तिरसानुकूलत्वेनेति द्रष्टव्यं ॥२०॥ [illegible] वमार्थमाह [illegible] राजवंशेति सोमवंशादि भूतस्यैलस्य चरितं ॥२१॥ तत्सुतस्य भीष्मस्य २७ दशमार्थमाह । तस्य कर्माणीति पूतनाया असुसहितस्य स्तन्यपयसः पानं ॥२८॥ सप्तानुः

दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥१७॥ त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥१८॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं ॥ मन्वंतरावतारश्च विष्णोर्हयशिरादयः ॥१९॥ कौर्म्यं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ क्षीरोदमथनं तद्वत् अमृतार्थे दिवौकसां ॥२०॥ देवासुरं महायुद्धं राजवंशानुकीर्त्तनं ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः ॥२१॥ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादान्नृगादयः ॥२२॥ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ॥ खट्वाङ्गस्य च मांधातुः सौभरेः सगरस्य च ॥२३॥ रामस्य कौशलेंद्रस्य चरितं किल्बिषापहं ॥ निमेरंगपरित्यागो जनकानां च संभवः ॥२४॥ रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥२५॥ दौष्यंतेर्भरतस्यापि शंतनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्त्तितः ॥ ॥२६॥ ॥ ॥ ॥

ध्या

४

भगवान्

यत्रावतीर्णो कृष्णाख्यो जगदीश्वरः॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले॥२७॥ तस्य कर्माण्यपाराणि कीर्त्तितान्यसुरद्विषः॥ पूतनासुपयःपानं शकटोत्सादनं शिशोः॥२८॥ तृणावर्त्तस्य निःपेषस्तथैव बकवत्सयोः॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः॥२९॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः॥ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं॥३०॥ व्रतचर्या नु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं॥३१॥ गोवर्द्धनोद्धारणं च शक्रस्य सुरभेरथ॥ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु॥३२॥ शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः॥ अक्रूरागमनं पश्चात् प्रस्थानं रामकृष्णयोः॥३३॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः॥३४॥ मृतस्यानयनं सूनोः पुनः सांदीपने गुरोः॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं॥ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः॥ जरासंधसमानीतसैन्यस्य बहुशो वधः॥ घातनं यवनेंद्रस्य कुशस्थल्यां निवेशनं॥३६॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात्॥ रुक्मिण्याहरणं युद्धे प्रमथ्य द्विषतो हरेः॥३७॥ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत्॥३८॥ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः॥ शंबरो द्विविदः पीठो मुरः पंचजनादयः॥३९॥ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं॥ भारावतरणं भूमेः निमित्तीकृत्य पांडवान्॥४०॥७॥७॥७॥

समस्वस्य २९ यज्ञाभिषेकं यज्ञपूजा अभिषेकश्च तयोर्द्वंद्वैक्यं ३२ द्विषतः शत्रून् प्रमथ्य २ येच शंबरादयः

५१

सर्गो विसर्गः स एव वाचः प्रयोगः जनताघसंप्लवः ॥ जनसमूहपापनाशकः यद्यस्मात्ततान्येव अन्यैः कीर्त्यमानानि शृण्वंति ॥ श्रोतरि सति गायंति । नोचेत्स्वयमेव गृणंति ॥ ५२ ॥ इदानीं ज्ञानकर्मादि सादपि भगवत्कीर्त्तनादिषे वा दरं कर्त्तव्यइत्याह ॥ नैः कर्म्यं ब्रह्म तत् स्वकात्राकं यत्तु ज्ञानं यतो निरंजनं उपाधि निवर्त्तकं तदप्यच्युतभक्तिवर्जितं चेत् । न शोभते नात्यर्थं परोक्षरूप यतं न भवती सर्वथ ॥ ईश्वरे न चेदर्पितं ॥ तर्हि यदत्युत्तमं सर्वोत्तमं पि कर्म तदपि पुनः कुतः शोभते ॥ यतः शश्वत् साधनकाले फलकाले च अभद्रं दुःखात्मकं ॥ ५३ ॥

म

किंच वर्णाश्रमाचारादिषु यः परो महान् प

घ

यत

सर्गो विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य यशोंकितानि शृण्वंति गायंति गृणंति साधवः ॥ ५२ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं ॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यनुत्तमं ॥ ५३ ॥ यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपः श्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥ ५४ ॥ ॥ ॥ ॥

रिश्रमः स यशोयुक्तायां श्रियामेव कीर्त्तिः संपत्तिश्च केवलं न परं पुरुषार्थः । गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिः श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ५४ ॥ ॥ ॥

५१

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं ॥ कुतः पुनः शश्वदभद्रमी प

ततः किमत आह अविस्मृतिरिति ॥ क्षिणोति नाशयति ॥५५॥ अथेदानीं श्रोतॄन् आत्मानं चाभिनंदन्नाह यूय
मिति द्वाभ्यां ॥ हे द्विजाग्र्याः यद्यस्मात् आत्मन्यंतःकरणे श्रीनारायणं आविवेश्य शश्वद्भजत संभावयो
नौ लोकं अतो भूरिभागाः बहुपुण्याः कथंभूतं अखिलात्मभूतं सर्वांतर्यामिणं अत एवेदं सर्वोपास्यं अदे
वं देवोऽन्यो यस्य तं कुतः ईशं ॥ यद्वा यस्मात् यूयं भूरिभा — — — — — — — — —
न १

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च ॥ सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञा
नं च विज्ञानविरागयुक्तं ॥५५॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं ॥
नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥५६॥ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे
परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां ॥५७॥ एतद्वः कथि
तं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ॥५८॥ य एवं श्रावयेन्नित्यं या
मक्षणमनन्यधीः ॥ श्रद्धावान् योनुशृणुयात् पुनात्यात्मानमेव सः ॥५९॥ ॥ ॥

गाः तपआदिसंपन्नाः ततो नारायणं भजतेति विधिः ॥५६॥ मे मया श्रुतं ॥५७॥ एतत्पुराणकीर्त्तनादिफ
लं प्रपंचयितुमाह ॥ ॥ एतद्व इत्यष्टभिः ॥५८॥ यामं क्षणं चेत्यर्थः आत्मानमे — — — — — —

राजन्य उदधिमेखलां पृथ्वीं संबिभर्षि ॥ ६५ ॥ अस्य पुराणस्यैव प्रभावातिरेके कारणमाह कलिमला नां संहतिं समूहं कालयति विनाशयतीति तथा इतरच्च शास्त्रांतरे ॥ ६६ ॥ शास्त्रप्रतिपादितं भगवंतं नमस्क रोति तमिति द्वाभ्यां ॥ जगदुदयस्थितिसंयमात्मानो रजआदयः शक्तयो यस्य तं । द्युपतिभिर्देवैरपि दुरव सितः अज्ञातः स्तवः स्तोत्रं यस्य तं ॥ ६७ ॥ उपचिताभिः उद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं स्थिरं जंगमं चालयो यस्य तस्मै भगवते ॥ ६८ ॥ श्रीगुरुं नमस्करोति ॥ स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तो ऽन्यस्मिन् भावो यस्य । तथाभूतो ऽपि अजितस्य रुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतिस्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतो ऽस्मीति ॥ ६९ ॥ ॥ इति द्वादशे द्वादशः ॥ ॥ १२ ॥ ॥ ॥ ॥ ७ ॥ ❋

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो ऽप्यजितरुचिरलीलाकृष्टसारस्तदीयं ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतो ऽस्मि ॥ ६९ ॥ ॥ इति श्रीभा० द्वाद० द्वादशः ॥ १२ ॥

सर्वपुराणसंख्यादीननुवर्णयिष्यन् तत्प्रतिपाद्यं देवं प्रणमति यमिति ॥ स्तवे वेदैः श्च ———

५३

ध्याने १

स्तुन्वंति स्तुवंति॥ उपनिषद्भ्दस्याकारांतत्वं छंदोनुरोधेन ॥ नावस्थितं निश्चलं तद्गतं यन्मनस्तेन । यस्यांतं न विदुः सुरगणाः॥१॥ क्षीरोदमथनादौ दुर्ज्ञेयित्वमेव प्रदर्शयितुं कूर्मावतारमनुस्मार। यन्नाशिषं प्रार्थयते॥ पृष्ठे भ्राम्यनू अमंदो गरिष्ठो मंदरगिरिस्तस्य ग्रावाणस्तेषामग्राणि तैः कंडूयनात् तेन सुखेन निद्रालोः शीलस्य येषां श्वासानिलानां संस्कारास्तेषां कलाः लेशाः तदनुवर्त्तनवशात्॥ जलनिधेरंभसां यातायातं न विश्राम्यति। ननु समुद्रक्षोभादेव तन्न संस्कारवशात् तत्राह॥ वेला

निद्रा

सूत उवाच॥ ॥यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः॥ ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः॥१॥ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः॥ यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनांभसां। यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यते॥२॥ सूतं० पुराणसंख्यासंभूतिमस्य वा ...च्यप्रयोजने॥ ॥दानंदा

५३

(100)

स्य

क्षो भस्तस्य निमेन मिषेण ॥१॥ पुराणसंख्यास्त्ता सो संभूतिं समाहारं च ॥ अस्य तु श्रीभागवतैर्वाच्ये विषयः प्रयोजनं च दा
नं च तस्य पागदेश्च माहात्म्यं निबोधत ॥३॥ त्रयोविंशत्त्रयोविंशतिश्च चतुर्विंशति सहस्राणि शैवकं शिवपुराणं ॥४॥ वान्हं तु अग्नि
पुराणं दशपंचसहस्राणि । चत्वारिंशतानि ५ स्कांदं शताधिकैः काशीतिसहस्त्रं ॥७॥ सोपर्णं गरुडपुराणं एकोनविंशति ॥८॥
महाभारते त्विति हासः ॥ रामायणं च ऋषि ॥ प्रोक्तं च काव्यं ॥ अतः पुराणानां संदोहः स

नस्य महात्म्यं पागदेश्च निबोधत ॥२॥ ब्राह्मं दश सहस्राणि पाद्मं पंचोनषष्टिं च ॥ श्रीवैष्णवं त्रयोविंशत् चतुर्विंशति
शैवकं ॥४॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशति ॥ मार्कंडं नव वान्हं च दश पंच चतुःशतं ॥५॥ चतुर्दश भविष्यं स्या
त् यथा पंचशतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ॥६॥ चतुर्विंशति वाराहमेकाशीति सहस्त्रकं ॥ स्कांदं
शतं तथा चैकं वामनं दशकीर्तितं ॥७॥ कौर्मं सप्तदश ख्यातं मात्स्यं तत्तु चतुर्दशं ॥ एकोनविंशं सोपर्णं ब्रह्मांडं द्वादश
शैव तु ॥८॥ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्त्रं श्रीभागवतमिष्यते ॥९॥ इदं भगवता पूर्वं
॥ ब्रह्मणे नाभिपंकजे ॥ स्थि

५४

मूलश्चतुर्लक्षणसंख्याक एव ॥ इदानीमस्य वाच्यप्रयोजनादीन्दर्शयितुमाह । तत्रेत्यादिना ॥ ९ ॥ हरिलीलाकथाव्रातः सम्मूहः स एवामृतं तेनानंदिताः संतः सुराश्चयेन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयं ॥ १२ ॥ प्रोष्टपद्यां भाद्रपद्यां हेमसिंहासनान्वितं स्वर्णसिंहासनारूढं ॥ १३ ॥ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य ॥ १५ ॥ पारमहंस्ये परमहंसैः प्राप्ये नैष्कर्म्ये सर्वकर्मोपरमः ॥ भक्त्या तच्छ्रवणादिपरो विमुच्यते ॥ १८ ॥ श्रीभागवतसंप्रदायप्रवर्तकरूपेण भगवद्ध्यानं मंगलमा — — — — — — — —

वर्त लक्षणं

तायनवनीताय कारुण्यात्संप्रकाशितं ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं ॥ हरिलीलाकथाव्रातामृतानंदित सु[illegible]रं ॥ ११ ॥ सर्ववेदांतसारं यत् ब्रह्मात्मैकत्वलक्षणं ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं ॥ १२ ॥ प्रोष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददाति यो भागवतं स याति परमां गतिं ॥ १३ ॥ राजंते तावदन्यानि पुराणानि सतां गणे ॥ [illegible] श्रूयते मृतसागरं ॥ १४ ॥ सर्ववेदांतसारं हि श्रीमद्भागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥ निम्नगानां यथा गंगा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥ १६ ॥ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ ॥ श्रीमद्भागवतं पुराणममलं० ॥ ॥

दिवस

यावद्भागवतं पुण्यं +

५४

चरति॥ कस्मै ब्रह्मणे॥ अतुलः असमः॥ अयं श्रीभागवतरूपः॥ पुरा कल्पादौ तद्रूपेण ब्रह्मरूपेण॥ तद्रूपिणा नारदरूपिणा॥ योगींद्राय शुकाय। तदात्मना शुककरूपेण एतत्परं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहीति॥ गायत्र्येव च यथोपक्रममुपसंहरन् गायत्र्याख्य ब्रह्मविद्येयमिति दर्शयति॥ १७॥ - - - - - - - - -

यं वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते॥ यत्र ज्ञान विरागभक्तिसहितं नैःकर्म्यमाविःकृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः॥ १८॥ कस्मै येन विभासितोयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा॥ योगींद्राय तदात्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि॥ १९॥ नमस्तस्मै भगवते वासुदेवाय साक्षिणे॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे॥ २०॥ योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत्॥ २१॥ भवे भवे यथा भक्तिः पादयोस्तव जायते॥ तथा कुरुष्व योगेश नाथ स्त्वं मे यतः प्रभो॥ २२॥ नामसंकीर्त्तनं यस्य सर्वपापप्रणाशनं॥ २३॥ प्रणामो दुःख -

५५

तमेवदेवतारूपेणगुरुरूपेणच प्रणमति॥नमइतिव्याचक्षेव्याख्यातवान्॥२४॥भावार्थदीपिकामेतांभगवद्भक्तवत्सलां॥श्रीपरमानंदपादाब्जभृंगश्रीश्रीधरोऽकरोत्॥

श्यामनस्तन्नमामिहरिंपरं॥२३॥ ॥इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेसूतोक्तेत्रयोदशोऽध्यायः॥१३॥ समाप्तोयंग्रंथः॥छ॥छ॥छ॥श्रीगजाननार्पणमस्तु॥श्रीलक्ष्म्यार्पणमस्तु॥छ॥छ॥छ॥छ॥

ला। स्वबालचपलोपैः स्वलीलापरिनर्तितैः॥प्रीयतांपरमानंदनन्दहरिःसद्गुरुःस्वयं॥श्रीपरमानंदसंप्रीत्यैगुह्यंभागवतंमया॥तन्मतेनेदमाख्यातंतनुमन्मतिवैभवात्॥ ॥इतिश्रीभागवतभावार्थदीपिकायांश्रीधरस्वामिविरचितायांद्वादशस्कंधेत्रयोदशोध्यायः॥१३॥ ॥श्रीगजाननार्पणमस्तु॥श्रीलक्ष्म्यार्पणमस्तु॥छ॥छ॥

५५

(१०५)